# ऋग्वेद-संहिता — मण्डल ६

## Ṛgveda-Saṁhitā—Maṇḍala 6

6.001.01a त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।

6.001.01c त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥

6.001.01a tvaṁ hy agne prathamo manotāsyā dhiyo abhavo dasma hotā |
6.001.01c tvaṁ sīṁ vṛṣann akṛṇor duṣṭarītu saho viśvasmai sahase sahadhyai ||

6.001.02a अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।

6.001.02c तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥

6.001.02a adhā hotā ny asīdo yajīyān iḷas pada iṣayann īḍyaḥ san |
6.001.02c taṁ tvā naraḥ prathamaṁ devayanto maho rāye citayanto anu gman ||

6.001.03a वृतेव यन्तं बहुभिर्वसव्यै३स्त्वे रयिं जागृवांसो अनु ग्मन् ।

6.001.03c रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥

6.001.03a vṛteva yantam bahubhir vasavyai3s tve rayiṁ jāgṛvāṁso anu gman |
6.001.03c ruśantam agniṁ darśatam bṛhantaṁ vapāvantaṁ viśvahā dīdivāṁsam ||

6.001.04a पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।

6.001.04c नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥

6.001.04a padaṁ devasya namasā vyantaḥ śravasyavaḥ śrava āpann amṛktam |
6.001.04c nāmāni cid dadhire yajñiyāni bhadrāyāṁ te raṇayanta sandṛṣṭau ||

6.001.05a त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।

6.001.05c त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥

6.001.05a tvāṁ vardhanti kṣitayaḥ pṛthivyāṁ tvāṁ rāya ubhayāso janānām |
6.001.05c tvaṁ trātā taraṇe cetyo bhūḥ pitā mātā sadam in mānuṣāṇām ||

6.001.06a सपर्येण्यः स प्रियो विक्ष्वग्निर्होता मन्द्रो नि षसादा यजीयान् ।

6.001.06c तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥

6.001.06a saparyeṇyaḥ sa priyo vikṣv a1gnir hotā mandro ni ṣasādā yajīyān |
6.001.06c taṁ tvā vayaṁ dama ā dīdivāṁsam upa jñubādho namasā sadema ||

6.001.07a तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।

6.001.07c त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥

6.001.07a taṁ tvā vayaṁ sudhyo3 navyam agne sumnāyava īmahe devayantaḥ |
6.001.07c tvaṁ viśo anayo dīdyāno divo agne bṛhatā rocanena ||

6.001.08a विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।

6.001.08c प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥

6.001.08a viśāṁ kaviṁ viśpatiṁ śaśvatīnāṁ nitośanaṁ vṛṣabhaṁ carṣaṇīnām |
6.001.08c pretīṣaṇim iṣayantam pāvakaṁ rājantam agniṁ yajataṁ rayīṇām ||

6.001.09a सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।

6.001.09c य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥

6.001.09a so agna īje śaśame ca marto yas ta ānaṭ samidhā havyadātim |
6.001.09c ya āhutim pari vedā namobhir viśvet sa vāmā dadhate tvotaḥ ||

6.001.10a अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।

6.001.10c वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥

6.001.10a asmā u te mahi mahe vidhema namobhir agne samidhota havyaiḥ |
6.001.10c vedī sūno sahaso gīrbhir ukthair ā te bhadrāyāṁ sumatau yatema ||

6.001.11a आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्य१स्तरुत्रः ।

6.001.11c बृहद्भिर्वाजै स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥

6.001.11a ā yas tatantha rodasī vi bhāsā śravobhiś ca śravasya1s tarutraḥ |
6.001.11c bṛhadbhir vājai sthavirebhir asme revadbhir agne vitaraṁ vi bhāhi ||

6.001.12a नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।

6.001.12c पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥

6.001.12a nṛvad vaso sadam id dhehy asme bhūri tokāya tanayāya paśvaḥ |
6.001.12c pūrvīr iṣo bṛhatīr āre-aghā asme bhadrā sauśravasāni santu ||

6.001.13a पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।

6.001.13c पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥

6.001.13a pu̱rūṇy a̍gne puru̱dhā tvā̱yā vasū̍ni rāja̍n va̱sutā̍ te a̍śyām |
6.001.13c pu̱rūṇi̱ hi tve pu̍ruvāra̱ santy agne̱ vasu̍ vidha̱te rāja̍ni̱ tve ||

6.002.01a त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।

6.002.01c त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥

6.002.01a tvaṁ hi kṣaita̍va̱d yaśo 'gne̍ mi̱tro na patya̍se |
6.002.01c tvaṁ vi̍carṣaṇe̱ śravo̱ vaso̍ pu̱ṣṭiṁ na pu̍ṣyasi ||

6.002.02a त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।

6.002.02c त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥

6.002.02a tvāṁ hi ṣmā̍ carṣa̱ṇayo̍ ya̱jñebhi̍r gī̱rbhir ī̱ḷate |
6.002.02c tvāṁ vā̱jī yā̍ty avṛ̱ko ra̍ja̱stūr vi̱śvacarṣa̍ṇi̱ḥ ||

6.002.03a सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।

6.002.03c यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥

6.002.03a sa̱jo̍ṣas tvā di̱vo naro̍ ya̱jñasya̍ ke̱tum i̍ndhate |
6.002.03c yad dha̱ sya mānu̍ṣo̱ jana̍ḥ sumnā̱yur ju̱hve a̍dhva̱re ||

6.002.04a ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।

6.002.04c ऊती ष बृहतो दिवो द्विषो अंहो न तरति ॥

6.002.04a ṛdha̱d yas te̍ su̱dāna̍ve dhi̱yā marta̍ḥ śaśama̍te |
6.002.04c ū̱tī ṣa bṛ̍ha̱to di̱vo dvi̱ṣo a̍ṁho̱ na ta̍rati ||

6.002.05a समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् ।

6.002.05c वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ॥

6.002.05a sa̱midhā̱ yas ta̱ āhu̍ti̱ṁ niśi̍ti̱m martyo̱ naśa̍t |
6.002.05c va̱yāva̍nta̱ṁ sa pu̍ṣyati̱ kṣaya̍m agne śa̱tāyu̍ṣam ||

6.002.06a त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।

6.002.06c सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥

6.002.06a tveṣas te dhūma ṛṇvati divi sañ chukra ātataḥ |

6.002.06c sūro na hi dyutā tvaṁ kṛpā pāvaka rocase ||

6.002.07a अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः ।

6.002.07c रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ॥

6.002.07a adhā hi vikṣv īḍyo 'si priyo no atithiḥ |

6.002.07c raṇvaḥ purīva jūryaḥ sūnur na trayayāyyaḥ ||

6.002.08a क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।

6.002.08c परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥

6.002.08a kratvā hi droṇe ajyase 'gne vājī na kṛtvyaḥ |

6.002.08c parijmeva svadhā gayo 'tyo na hvāryaḥ śiśuḥ ||

6.002.09a त्वं त्या चिदच्युताग्ने पशुर्न यवसे ।

6.002.09c धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥

6.002.09a tvaṁ tyā cid acyutāgne paśur na yavase |

6.002.09c dhāmā ha yat te ajara vanā vṛścanti śikvasaḥ ||

6.002.10a वेषि ह्यध्वरीयतामग्ने होता दमे विशाम् ।

6.002.10c समृधो विश्पते कृणु जुषस्व हव्यमङ्गिरः ॥

6.002.10a veṣi hy adhvarīyatām agne hotā dame viśām |

6.002.10c samṛdho viśpate kṛṇu juṣasva havyam aṅgiraḥ ||

6.002.11a अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।

6.002.11c वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥

6.002.11a acchā no mitramaho deva devān agne vocaḥ sumatiṁ rodasyoḥ |

6.002.11c vīhi svastiṁ sukṣitiṁ divo nṝn dviṣo aṁhāṁsi duritā tarema tā tarema tavāvasā tarema ||

6.003.01a अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।

6.003.01c यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥

6.003.01a agne sa kṣeṣad ṛtapā ṛtejā uru jyotir naśate devayuṣ ṭe |
6.003.01c yaṁ tvam mitreṇa varuṇaḥ sajoṣā deva pāsi tyajasā martam aṁhaḥ ||

6.003.02a ईजे यज्ञेभिः शशमे शमीभिरृधद्वारायाग्नये ददाश ।

6.003.02c एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः ॥

6.003.02a īje yajñebhiḥ śaśame śamībhir ṛdhadvārāyāgnaye dadāśa |
6.003.02c evā cana taṁ yaśasām ajuṣṭir nāṁho martaṁ naśate na pradṛptiḥ ||

6.003.03a सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।

6.003.03c हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥

6.003.03a sūro na yasya dṛśatir arepā bhīmā yad eti śucatas ta ā dhīḥ |
6.003.03c heṣasvataḥ śurudho nāyam aktoḥ kutrā cid raṇvo vasatir vanejāḥ ||

6.003.04a तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।

6.003.04c विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥

6.003.04a tigmaṁ cid ema mahi varpo asya bhasad aśvo na yamasāna āsā |
6.003.04c vijehamānaḥ paraśur na jihvāṁ dravir na drāvayati dāru dhakṣat ||

6.003.05a स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।

6.003.05c चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥

6.003.05a sa id asteva prati dhād asiṣyañ chiśīta tejo 'yaso na dhārām |
6.003.05c citradhrajatir aratir yo aktor ver na druṣadvā raghupatmajaṁhāḥ ||

6.003.06a स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।

6.003.06c नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन् ॥

6.003.06a sa īṁ rebho na prati vasta usrāḥ śociṣā rārapīti mitramahāḥ |
6.003.06c naktaṁ ya īm aruṣo yo divā nṝn amartyo aruṣo yo divā nṝn ||

6.003.07a दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।

6.003.07c घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥

6.003.07a divo na yasya vidhato navīnod vṛṣā rukṣa oṣadhīṣu nūnot |
6.003.07c ghṛṇā na yo dhrajasā patmanā yann ā rodasī vasunā daṁ supatnī ||

6.003.08a धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।

6.003.08c शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥

6.003.08a dhāyobhir vā yo yujyebhir arkair vidyun na davidyot svebhiḥ śuṣmaiḥ |
6.003.08c śardho vā yo marutāṁ tatakṣa ṛbhur na tveṣo rabhasāno adyaut ||

6.004.01a यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।

6.004.01c एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥

6.004.01a yathā hotar manuṣo devatātā yajñebhiḥ sūno sahaso yajāsi |
6.004.01c evā no adya samanā samānān uśann agna uśato yakṣi devān ||

6.004.02a स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।

6.004.02c विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥

6.004.02a sa no vibhāvā cakṣaṇir na vastor agnir vandāru vedyaś cano dhāt |
6.004.02c viśvāyur yo amṛto martyeṣūṣarbhud bhūd atithir jātavedāḥ ||

6.004.03a द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।

6.004.03c वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥

6.004.03a dyāvo na yasya panayanty abhvam bhāsāṁsi vaste sūryo na śukraḥ |
6.004.03c vi ya inoty ajaraḥ pāvako 'śnasya cic chiśnathat pūrvyāṇi ||

6.004.04a वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।

6.004.04c स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥

6.004.04a vadmā hi sūno asy admasadvā cakre agnir januṣājmānnam |
6.004.04c sa tvaṁ na ūrjasana ūrjaṁ dhā rājeva jer avṛke kṣeṣy antaḥ ||

6.004.05a नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।

6.004.05c तुर्याम यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ॥

6.004.05a nitikti yo vāraṇam annam atti vāyur na rāṣṭry aty ety aktūn |
6.004.05c turyāma yas ta ādiśām arātīr atyo na hrutaḥ patataḥ parihrut ||

6.004.06a आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ रोदसी वि भासा ।

6.004.06c चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥

6.004.06a ā sūryo na bhānumadbhir arkair agne tatantha rodasī vi bhāsā |
6.004.06c citro nayat pari tamāṁsy aktaḥ śociṣā patmann auśijo na dīyan ||

6.004.07a त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।

6.004.07c इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥

6.004.07a tvāṁ hi mandratamam arkaśokair vavṛmahe mahi naḥ śroṣy agne |
6.004.07c indraṁ na tvā śavasā devatā vāyum pṛṇanti rādhasā nṛtamāḥ ||

6.004.08a नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।

6.004.08c ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥

6.004.08a nū no agne 'vṛkebhiḥ svasti veṣi rāyaḥ pathibhiḥ parṣy aṁhaḥ |
6.004.08c tā sūribhyo gṛṇate rāsi sumnam madema śatahimāḥ suvīrāḥ ||

6.005.01a हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम् ।

6.005.01c य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥

6.005.01a huve vaḥ sūnuṁ sahaso yuvānam adroghavācam matibhir yaviṣṭham |
6.005.01c ya invati draviṇāni pracetā viśvavārāṇi puruvāro adhruk ||

6.005.02a त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।

6.005.02c क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥

6.005.02a tve vasūni purvaṇīka hotar doṣā vastor erire yajñiyāsaḥ |
6.005.02c kṣāmeva viśvā bhuvanāni yasmin saṁ saubhagāni dadhire pāvake ||

6.005.03a त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।

6.005.03c अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ॥

6.005.03a tvaṁ vikṣu pradivaḥ sīda āsu kratvā rathīr abhavo vāryāṇām |
6.005.03c ata inoṣi vidhate cikitvo vy ānuṣag jātavedo vasūni ||

6.005.04a यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।

6.005.04c तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥

6.005.04a yo naḥ sanutyo abhidāsad agne yo antaro mitramaho vanuṣyāt |
6.005.04c tam ajarebhir vṛṣabhis tava svais tapā tapiṣṭha tapasā tapasvān ||

6.005.05a यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत्।

6.005.05c स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥

6.005.05a yas te yajñena samidhā ya ukthair arkebhiḥ sūno sahaso dadāśat |
6.005.05c sa martyeṣv amṛta pracetā rāyā dyumnena śravasā vi bhāti ||

6.005.06a स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान्।

6.005.06c यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥

6.005.06a sa tat kṛdhīṣitas tūyam agne spṛdho bādhasva sahasā sahasvān |
6.005.06c yac chasyase dyubhir akto vacobhis taj juṣasva jaritur ghoṣi manma ||

6.005.07a अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम्।

6.005.07c अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥

6.005.07a aśyāma taṁ kāmam agne tavotī aśyāma rayiṁ rayivaḥ suvīram |
6.005.07c aśyāma vājam abhi vājayanto 'śyāma dyumnam ajarājaraṁ te ||

6.006.01a प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः।

6.006.01c वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति ॥

6.006.01a pra navyasā sahasaḥ sūnum acchā yajñena gātum ava icchamānaḥ |
6.006.01c vṛścadvanaṁ kṛṣṇayāmaṁ ruśantaṁ vītī hotāraṁ divyaṁ jigāti ||

6.006.02a स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः।

6.006.02c यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्॥

6.006.02a sa śvitānas tanyatū rocanasthā ajarebhir nānadadbhir yaviṣṭhaḥ |
6.006.02c yaḥ pāvakaḥ purutamaḥ purūṇi pṛthūny agnir anuyāti bharvan ||

6.006.03a वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति।

6.006.03c तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥

6.006.03a vi te viṣvag vātajūtāso agne bhāmāsaḥ śuce śucayaś caranti |
6.006.03c tuvimrakṣāso divyā navagvā vanā vananti dhṛṣatā rujantaḥ ||

6.006.04a ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।

6.006.04c अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥

6.006.04a ye te śukrāsaḥ śucayaḥ śuciṣmaḥ kṣāṁ vapanti viṣitāso aśvāḥ |
6.006.04c adha bhramas ta urviyā vi bhāti yātayamāno adhi sānu pṛśneḥ ||

6.006.05a अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।

6.006.05c शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥

6.006.05a adha jihvā pāpatīti pra vṛṣṇo goṣuyudho nāśaniḥ sṛjānā |
6.006.05c śūrasyeva prasitiḥ kṣātir agner durvartur bhīmo dayate vanāni ||

6.006.06a आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ ।

6.006.06c स बाधस्वाप भया सहोभि स्पृधो वनुष्यन्वनुषो नि जूर्व ॥

6.006.06a ā bhānunā pārthivāni jrayāṁsi mahas todasya dhṛṣatā tatantha |
6.006.06c sa bādhasvāpa bhayā sahobhi spṛdho vanuṣyan vanuṣo ni jūrva ||

6.006.07a स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।

6.006.07c चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व ॥

6.006.07a sa citra citraṁ citayantam asme citrakṣatra citratamaṁ vayodhām |
6.006.07c candraṁ rayim puruvīram bṛhantaṁ candra candrābhir gṛṇate yuvasva ||

6.007.01a मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।

6.007.01c कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥

6.007.01a mūrdhānaṁ divo aratim pṛthivyā vaiśvānaram ṛta ā jātam agnim |
6.007.01c kaviṁ samrājam atithiṁ janānām āsann ā pātraṁ janayanta devāḥ ||

6.007.02a नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।

6.007.02c वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥

6.007.02a nābhiṁ yajñānāṁ sadanaṁ rayīṇām mahām āhāvam abhi saṁ navanta |
6.007.02c vaiśvānaraṁ rathyam adhvarāṇāṁ yajñasya ketuṁ janayanta devāḥ ||

6.007.03a त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।

6.007.03c वैश्वानर त्वमस्मासु धेहि वसूनि राजन्स्पृहयाय्याणि ॥

6.007.03a tvad vipro jāyate vājy agne tvad vīrāso abhimātiṣāhaḥ |
6.007.03c vaiśvānara tvam asmāsu dhehi vasūni rājan spṛhayāyyāṇi ||

6.007.04a त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।

6.007.04c तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥

6.007.04a tvāṁ viśve amṛta jāyamānaṁ śiśuṁ na devā abhi saṁ navante |
6.007.04c tava kratubhir amṛtatvam āyan vaiśvānara yat pitror adīdeḥ ||

6.007.05a वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।

6.007.05c यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ॥

6.007.05a vaiśvānara tava tāni vratāni mahāny agne nakir ā dadharṣa |
6.007.05c yaj jāyamānaḥ pitror upasthe 'vindaḥ ketuṁ vayuneṣv ahnām ||

6.007.06a वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।

6.007.06c तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ॥

6.007.06a vaiśvānarasya vimitāni cakṣasā sānūni divo amṛtasya ketunā |
6.007.06c tasyed u viśvā bhuvanādhi mūrdhani vayā iva ruruhuḥ sapta visruhaḥ ||

6.007.07a वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।

6.007.07c परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥

6.007.07a vi yo rajāṁsy amimīta sukratur vaiśvānaro vi divo rocanā kaviḥ |
6.007.07c pari yo viśvā bhuvanāni paprathe 'dabdho gopā amṛtasya rakṣitā ||

6.008.01a पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।

6.008.01c वैश्वानराय मतिर्नव्यसी शुचिः सोम इव पवते चारुरग्नये ॥

6.008.01a pṛkṣasya vṛṣṇo aruṣasya nū sahaḥ pra nu vocaṁ vidathā jātavedasaḥ |
6.008.01c vaiśvānarāya matir navyasī śuciḥ soma iva pavate cārur agnaye ||

6.008.02a स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।

6.008.02c व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥

6.008.02a sa jāyamānaḥ parame vyomani vratāny agnir vratapā arakṣata |
6.008.02c vy a1ntarikṣam amimīta sukratur vaiśvānaro mahinā nākam aspṛśat ||

6.008.03a व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः ।

6.008.03c वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥

6.008.03a vy astabhnād rodasī mitro adbhuto 'ntarvāvad akṛṇoj jyotiṣā tamaḥ |
6.008.03c vi carmaṇīva dhiṣaṇe avartayad vaiśvānaro viśvam adhatta vṛṣṇyam ||

6.008.04a अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुरृग्मियम् ।

6.008.04c आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥

6.008.04a apām upasthe mahiṣā agṛbhṇata viśo rājānam upa tasthur ṛgmiyam |
6.008.04c ā dūto agnim abharad vivasvato vaiśvānaram mātariśvā parāvataḥ ||

6.008.05a युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम् ।

6.008.05c पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥

6.008.05a yuge-yuge vidathyaṁ gṛṇadbhyo 'gne rayiṁ yaśasaṁ dhehi navyasīm |
6.008.05c pavyeva rājann aghaśaṁsam ajara nīcā ni vṛśca vaninaṁ na tejasā ||

6.008.06a अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम् ।

6.008.06c वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥

6.008.06a asmākam agne maghavatsu dhārayānāmi kṣatram ajaraṁ suvīryam |
6.008.06c vayaṁ jayema śatinaṁ sahasriṇaṁ vaiśvānara vājam agne tavotibhiḥ ||

6.008.07a अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।

6.008.07c रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारी स्तवानः ॥

6.008.07a adabdhebhis tava gopābhir iṣṭe 'smākam pāhi triṣadhastha sūrīn |
6.008.07c rakṣā ca no daduṣāṁ śardho agne vaiśvānara pra ca tārī stavānaḥ ||

6.009.01a अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।

6.009.01c वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥

6.009.01a ahaś ca kṛṣṇam ahar arjunaṁ ca vi vartete rajasī vedyābhiḥ |
6.009.01c vaiśvānaro jāyamāno na rājāvātiraj jyotiṣāgnis tamāṁsi ||

6.009.02a नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।

6.009.02c कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥

6.009.02a nāhaṁ tantuṁ na vi jānāmy otuṁ na yaṁ vayanti samare 'tamānāḥ |
6.009.02c kasya svit putra iha vaktvāni paro vadāty avareṇa pitrā ||

6.009.03a स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।

6.009.03c य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥

6.009.03a sa it tantuṁ sa vi jānāty otuṁ sa vaktvāny ṛtuthā vadāti |
6.009.03c ya īṁ ciketad amṛtasya gopā avaś caran paro anyena paśyan ||

6.009.04a अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।

6.009.04c अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥

6.009.04a ayaṁ hotā prathamaḥ paśyatemam idaṁ jyotir amṛtam martyeṣu |
6.009.04c ayaṁ sa jajñe dhruva ā niṣatto 'martyas tanvā3 vardhamānaḥ ||

6.009.05a ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।

6.009.05c विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ॥

6.009.05a dhruvaṁ jyotir nihitaṁ dṛśaye kam mano javiṣṭham patayatsv antaḥ |
6.009.05c viśve devāḥ samanasaḥ saketā ekaṁ kratum abhi vi yanti sādhu ||

6.009.06a वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् ।

6.009.06c वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥

6.009.06a vi me karṇā patayato vi cakṣur vī3daṁ jyotir hṛdaya āhitaṁ yat |
6.009.06c vi me manaś carati dūraādhīḥ kiṁ svid vakṣyāmi kim u nū maniṣye ||

6.009.07a विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।

6.009.07c वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥

6.009.07a viśve devā anamasyan bhiyānās tvām agne tamasi tasthivāṁsam |
6.009.07c vaiśvānaro 'vatūtaye no 'martyo 'vatūtaye naḥ ||

6.010.01a पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।

6.010.01c पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥

6.010.01a puro vo mandraṁ divyaṁ suvṛktim prayati yajñe agnim adhvare dadhidhvam |
6.010.01c pura ukthebhiḥ sa hi no vibhāvā svadhvarā karati jātavedāḥ ||

6.010.02a तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः ।

6.010.02c स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥

6.010.02a tam u dyumaḥ purvaṇīka hotar agne agnibhir manuṣa idhānaḥ |
6.010.02c stomaṁ yam asmai mamateva śūṣaṁ ghṛtaṁ na śuci matayaḥ pavante ||

6.010.03a पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।

6.010.03c चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥

6.010.03a pīpāya sa śravasā martyeṣu yo agnaye dadāśa vipra ukthaiḥ |
6.010.03c citrābhis tam ūtibhiś citraśocir vrajasya sātā gomato dadhāti ||

6.010.04a आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।

6.010.04c अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः ॥

6.010.04a ā yaḥ paprau jāyamāna urvī dūredṛśā bhāsā kṛṣṇādhvā |
6.010.04c adha bahu cit tama ūrmyāyās tiraḥ śociṣā dadṛśe pāvakaḥ ||

6.010.05a नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।

6.010.05c ये राधसा श्रवसा चात्यन्यान्सुवीर्येभिश्चाभि सन्ति जनान् ॥

6.010.05a nū naś citram puruvājābhir ūtī agne rayim maghavadbhyaś ca dhehi |
6.010.05c ye rādhasā śravasā cāty anyān suvīryebhiś cābhi santi janān ||

6.010.06a इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान् ।

6.010.06c भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥

6.010.06a imaṁ yajñaṁ cano dhā agna uśan yaṁ ta āsāno juhute haviṣmān |
6.010.06c bharadvājeṣu dadhiṣe suvṛktim avīr vājasya gadhyasya sātau ||

6.010.07a वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ॥

6.010.07a vi dveṣāṁsīnuhi vardhayeḷām madema śatahimāḥ suvīrāḥ ||

6.011.01a यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति ।

6.011.01c आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥

6.011.01a yajasva hotar iṣito yajīyān agne bādho marutāṁ na prayukti |
6.011.01c ā no mitrāvaruṇā nāsatyā dyāvā hotrāya pṛthivī vavṛtyāḥ ||

6.011.02a त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।

6.011.02c पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥

6.011.02a tvaṁ hotā mandratamo no adhrug antar devo vidathā martyeṣu |
6.011.02c pāvakayā juhvā3 vahnir āsāgne yajasva tanvaṁ1 tava svām ||

6.011.03a धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै ।

6.011.03c वेपिष्ठो अङ्गिरसां यद्ध विप्रो मधु च्छन्दो भनति रेभ इष्टौ ॥

6.011.03a dhanyā cid dhi tve dhiṣaṇā vaṣṭi pra devāñ janma gṛṇate yajadhyai |
6.011.03c vepiṣṭho aṅgirasāṁ yad dha vipro madhu cchando bhanati rebha iṣṭau ||

6.011.04a अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची ।

6.011.04c आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ॥

6.011.04a adidyutat sv apāko vibhāvāgne yajasva rodasī urūcī |
6.011.04c āyuṁ na yaṁ namasā rātahavyā añjanti suprayasam pañca janāḥ ||

6.011.05a वृञ्जे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः ।

6.011.05c अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥

6.011.05a vṛñje ha yan namasā barhir agnāv ayāmi srug ghṛtavatī suvṛktiḥ |
6.011.05c amyakṣi sadma sadane pṛthivyā aśrāyi yajñaḥ sūrye na cakṣuḥ ||

6.011.06a दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः ।

6.011.06c रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ॥

6.011.06a daśasyā naḥ purvaṇīka hotar devebhir agne agnibhir idhānaḥ |
6.011.06c rāyaḥ sūno sahaso vāvasānā ati srasema vṛjanaṁ nāṁhaḥ ||

6.012.01a मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै ।

6.012.01c अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान ॥

6.012.01a madhye hotā durone barhiṣo rāḷ agnis todasya rodasī yajadhyai |
6.012.01c ayaṁ sa sūnuḥ sahasa ṛtāvā dūrāt sūryo na śociṣā tatāna ||

6.012.02a आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्सर्वतातेव नु द्यौः ।

6.012.02c त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥

6.012.02a ā yasmin tve sv apāke yajatra yakṣad rājan sarvatāteva nu dyauḥ |
6.012.02c triṣadhasthas tataruṣo na jaṁho havyā maghāni mānuṣā yajadhyai ||

6.012.03a तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।

6.012.03c अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥

6.012.03a tejiṣṭhā yasyāratir vanerāṭ todo adhvan na vṛdhasāno adyaut |
6.012.03c adrogho na dravitā cetati tmann amartyo 'vartra oṣadhīṣu ||

6.012.04a सास्माकेभिरेतरी न शूषैरग्नि ष्टवे दम आ जातवेदाः ।

6.012.04c द्रवन्नो वन्वन्क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥

6.012.04a sāsmākebhir etarī na śūṣair agni ṣṭave dama ā jātavedāḥ |
6.012.04c drvanno vanvan kratvā nārvosraḥ piteva jārayāyi yajñaiḥ ||

6.012.05a अध स्मास्य पनयन्ति भासो वृथा यत्तक्षदनुयाति पृथ्वीम् ।

6.012.05c सद्यो यः स्यन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥

6.012.05a adha smāsya panayanti bhāso vṛthā yat takṣad anuyāti pṛthvīm |
6.012.05c sadyo yaḥ syandro viṣito dhavīyān ṛṇo na tāyur ati dhanvā rāṭ ||

6.012.06a स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।

6.012.06c वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥

6.012.06a sa tvaṁ no arvan nidāyā viśvebhir agne agnibhir idhānaḥ |
6.012.06c veṣi rāyo vi yāsi ducchunā madema śatahimāḥ suvīrāḥ ||

6.013.01a त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः ।

6.013.01c श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥

6.013.01a tvad viśvā subhaga saubhagāny agne vi yanti vanino na vayāḥ |
6.013.01c śruṣṭī rayir vājo vṛtratūrye divo vṛṣṭir īḍyo rītir apām ||

6.013.02a त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।

6.013.02c अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः ॥

6.013.02a tvam bhago na ā hi ratnam iṣe parijmeva kṣayasi dasmavarcāḥ |
6.013.02c agne mitro na bṛhata ṛtasyāsi kṣattā vāmasya deva bhūreḥ ||

6.013.03a स सत्पतिः शवसा हन्ति वृत्रमग्ने विप्रो वि पणेर्भर्ति वाजम् ।

6.013.03c यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥

6.013.03a sa satpatiḥ śavasā hanti vṛtram agne vipro vi paṇer bharti vājam |
6.013.03c yaṁ tvam praceta ṛtajāta rāyā sajoṣā naptrāpāṁ hinoṣi ||

6.013.04a यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।

6.013.04c विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ॥

6.013.04a yas te sūno sahaso gīrbhir ukthair yajñair marto niśitiṁ vedyānaṭ |
6.013.04c viśvaṁ sa deva prati vāram agne dhatte dhānya1m patyate vasavyaiḥ ||

6.013.05a ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।

6.013.05c कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥

6.013.05a tā nṛbhya ā sauśravasā suvīrāgne sūno sahasaḥ puṣyase dhāḥ |
6.013.05c kṛṇoṣi yac chavasā bhūri paśvo vayo vṛkāyāraye jasuraye ||

6.013.06a वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।

6.013.06c विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ॥

6.013.06a vadmā sūno sahaso no vihāyā agne tokaṁ tanayaṁ vāji no dāḥ |
6.013.06c viśvābhir gīrbhir abhi pūrtim aśyām madema śatahimāḥ suvīrāḥ ||

6.014.01a अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः ।

6.014.01c भसन्नु ष प्र पूर्व्य इषं वुरीतावसे ॥

6.014.01a agnā yo martyo duvo dhiyaṁ jujoṣa dhītibhiḥ |
6.014.01c bhasan nu ṣa pra pūrvya iṣaṁ vurītāvase ||

6.014.02a अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः ।

6.014.02c अग्निं होतारमीळते यज्ञेषु मनुषो विशः ॥

6.014.02a agnir id dhi pracetā agnir vedhastama ṛṣiḥ |
6.014.02c agniṁ hotāram īḷate yajñeṣu manuṣo viśaḥ ||

6.014.03a नाना ह्य१ग्नेऽवसे स्पर्धन्ते रायो अर्यः ।

6.014.03c तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम् ॥

6.014.03a nānā hy a1gne 'vase spardhante rāyo aryaḥ |
6.014.03c tūrvanto dasyum āyavo vrataiḥ sīkṣanto avratam ||

6.014.04a अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम् ।

6.014.04c यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया ॥

6.014.04a agnir apsām ṛtīṣahaṁ vīraṁ dadāti satpatim |
6.014.04c yasya trasanti śavasaḥ sañcakṣi śatravo bhiyā ||

6.014.05a अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति ।

6.014.05c सहावा यस्यावृतो रयिर्वाजेष्ववृतः ॥

6.014.05a agnir hi vidmanā nido devo martam uruṣyati |
6.014.05c sahāvā yasyāvṛto rayir vājeṣv avṛtaḥ ||

6.014.06a अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।

6.014.06c वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥

6.014.06a acchā no mitramaho deva devān agne vocaḥ sumatiṁ rodasyoḥ |
6.014.06c vīhi svastiṁ sukṣitiṁ divo nṝn dviṣo aṁhāṁsi duritā tarema tā tarema tavāvasā tarema ||

6.015.01a इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।

6.015.01c वेतीद्दिवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतम् ॥

6.015.01a imam ū ṣu vo atithim uṣarbudhaṁ viśvāsāṁ viśām patim ṛñjase girā |
6.015.01c vetīd divo januṣā kac cid ā śucir jyok cid atti garbho yad acyutam ||

6.015.02a मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।

6.015.02c स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥

6.015.02a mitraṁ na yaṁ sudhitam bhṛgavo dadhur vanaspatāv īḍyam ūrdhvaśociṣam |
6.015.02c sa tvaṁ suprīto vītahavye adbhuta praśastibhir mahayase dive-dive ||

6.015.03a स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यान्तरस्य तरुषः ।

6.015.03c रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥

6.015.03a sa tvaṁ dakṣasyāvṛko vṛdho bhūr aryaḥ parasyāntarasya taruṣaḥ |
6.015.03c rāyaḥ sūno sahaso martyeṣv ā chardir yaccha vītahavyāya sapratho bharadvājāya saprathaḥ ||

6.015.04a द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम् ।

6.015.04c विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे ॥

6.015.04a dyutānaṁ vo atithiṁ svarṇaram agniṁ hotāram manuṣaḥ svadhvaram |
6.015.04c vipraṁ na dyukṣavacasaṁ suvṛktibhir havyavāham aratiṁ devam ṛñjase ||

6.015.05a पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना ।

6.015.05c तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥

6.015.05a pāvakayā yaś citayantyā kṛpā kṣāman ruruca uṣaso na bhānunā |
6.015.05c tūrvan na yāmann etaśasya nū raṇa ā yo ghṛṇe na tatṛṣāṇo ajaraḥ ||

6.015.06a अग्निमग्निं वः समिधा दुवस्यत प्रियम्प्रियं वो अतिथिं गृणीषणि ।

6.015.06c उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः ॥

6.015.06a agnim-agniṁ vaḥ samidhā duvasyata priyam-priyaṁ vo atithiṁ gṛṇīṣaṇi |
6.015.06c upa vo gīrbhir amṛtaṁ vivāsata devo deveṣu vanate hi vāryaṁ devo deveṣu vanate hi no duvaḥ ||

6.015.07a समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।

6.015.07c विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥

6.015.07a samiddham agniṁ samidhā girā gṛṇe śucim pāvakam puro adhvare dhruvam |
6.015.07c vipraṁ hotāram puruvāram adruhaṁ kaviṁ sumnair īmahe jātavedasam ||

6.015.08a त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।

6.015.08c देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥

6.015.08a tvāṁ dūtam agne amṛtaṁ yuge-yuge havyavāhaṁ dadhire pāyum īḍyam |
6.015.08c devāsaś ca martāsaś ca jāgṛviṁ vibhuṁ viśpatiṁ namasā ni ṣedire ||

6.015.09a विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।

6.015.09c यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥

6.015.09a vibhūṣann agna ubhayām̐ anu vratā dūto devānāṁ rajasī sam īyase |
6.015.09c yat te dhītiṁ sumatim āvṛṇīmahe 'dha smā nas trivarūthaḥ śivo bhava ||

6.015.10a तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।

6.015.10c स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत् ॥

6.015.10a taṁ supratīkaṁ sudṛśaṁ svañcam avidvāṁso viduṣṭaraṁ sapema |
6.015.10c sa yakṣad viśvā vayunāni vidvān pra havyam agnir amṛteṣu vocat ||

6.015.11a तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम् ।

6.015.11c यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया ॥

6.015.11a tam agne pāsy uta tam piparṣi yas ta ānaṭ kavaye śūra dhītim |
6.015.11c yajñasya vā niśitiṁ voditiṁ vā tam it pṛṇakṣi śavasota rāyā ||

6.015.12a त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।

6.015.12c सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयि स्पृहयाय्यः सहस्री ॥

6.015.12a tvam agne vanuṣyato ni pāhi tvam u naḥ sahasāvann avadyāt |
6.015.12c saṁ tvā dhvasmanvad abhy etu pāthaḥ saṁ rayi spṛhayāyyaḥ sahasrī ||

6.015.13a अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।

6.015.13c देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥

6.015.13a agnir hotā gṛhapatiḥ sa rājā viśvā veda janimā jātavedāḥ |
6.015.13c devānām uta yo martyānāṁ yajiṣṭhaḥ sa pra yajatām ṛtāvā ||

6.015.14a अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा ।

6.015.14c ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥

6.015.14a agne yad adya viśo adhvarasya hotaḥ pāvakaśoce veṣ ṭvaṁ hi yajvā |

6.015.14c ṛtā yajāsi mahinā vi yad bhūr havyā vaha yaviṣṭha yā te adya ||

6.015.15a अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।

6.015.15c अवा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥

6.015.15a abhi prayāṁsi sudhitāni hi khyo ni tvā dadhīta rodasī yajadhyai |
6.015.15c avā no maghavan vājasātāv agne viśvāni duritā tarema tā tarema tavāvasā tarema ||

6.015.16a अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।

6.015.16c कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥

6.015.16a agne viśvebhiḥ svanīka devair ūrṇāvantam prathamaḥ sīda yonim |
6.015.16c kulāyinaṁ ghṛtavantaṁ savitre yajñaṁ naya yajamānāya sādhu ||

6.015.17a इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः ।

6.015.17c यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः ॥

6.015.17a imam u tyam atharvavad agnim manthanti vedhasaḥ |
6.015.17c yam aṅkūyantam ānayann amūraṁ śyāvyābhyaḥ ||

6.015.18a जनिष्वा देववीतये सर्वताता स्वस्तये ।

6.015.18c आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥

6.015.18a janiṣvā devavītaye sarvatātā svastaye |
6.015.18c ā devān vakṣy amṛtām̐ ṛtāvṛdho yajñaṁ deveṣu pispṛśaḥ ||

6.015.19a वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।

6.015.19c अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि ॥

6.015.19a vayam u tvā gṛhapate janānām agne akarma samidhā bṛhantam |
6.015.19c asthūri no gārhapatyāni santu tigmena nas tejasā saṁ śiśādhi ||

6.016.01a त्वमग्ने यज्ञानां होता विश्वेषां हितः ।

6.016.01c देवेभिर्मानुषे जने ॥

6.016.01a tvam agne yajñānāṁ hotā viśveṣāṁ hitaḥ |
6.016.01c devebhir mānuṣe jane ||

6.016.02a स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः ।

6.016.02c आ देवान्वक्षि यक्षि च ॥

6.016.02a sa no mandrābhir adhvare jihvābhir yajā mahaḥ |
6.016.02c ā devān vakṣi yakṣi ca ||

6.016.03a वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा ।

6.016.03c अग्ने यज्ञेषु सुक्रतो ॥

6.016.03a vetthā hi vedho adhvanaḥ pathaś ca devāñjasā |
6.016.03c agne yajñeṣu sukrato ||

6.016.04a त्वामीळे अध द्विता भरतो वाजिभिः शुनम् ।

6.016.04c ईजे यज्ञेषु यज्ञियम् ॥

6.016.04a tvām īḻe adha dvitā bharato vājibhiḥ śunam |
6.016.04c īje yajñeṣu yajñiyam ||

6.016.05a त्वमिमा वार्या पुरु दिवोदासाय सुन्वते ।

6.016.05c भरद्वाजाय दाशुषे ॥

6.016.05a tvam imā vārya puru divodāsāya sunvate |
6.016.05c bharadvājāya dāśuṣe ||

6.016.06a त्वं दूतो अमर्त्य आ वहा दैव्यं जनम् ।

6.016.06c शृण्वन्विप्रस्य सुष्टुतिम् ॥

6.016.06a tvaṁ dūto amartya ā vahā daivyaṁ janam |
6.016.06c śṛṇvan viprasya suṣṭutim ||

6.016.07a त्वामग्ने स्वाध्यो३ मर्तासो देववीतये ।

6.016.07c यज्ञेषु देवमीळते ॥

6.016.07a tvām agne svādhyo3 martāso devavītaye |
6.016.07c yajñeṣu devam īḻate ||

6.016.08a तव प्र यक्षि संदृशमुत क्रतुं सुदानवः ।

6.016.08c विश्वे जुषन्त कामिनः ॥

6.016.08a tava pra yakṣi sandṛśam uta kratuṁ sudānavaḥ |

6.016.08c viśve juṣanta kāminaḥ ||

6.016.09a त्वं होता मनुर्हितो वह्निरासा विदुष्टरः ।

6.016.09c अग्ने यक्षि दिवो विशः ॥

6.016.09a tvaṁ hotā manurhito vahnir āsā viduṣṭaraḥ |

6.016.09c agne yakṣi divo viśaḥ ||

6.016.10a अग्न आ याहि वीतये गृणानो हव्यदातये ।

6.016.10c नि होता सत्सि बर्हिषि ॥

6.016.10a agna ā yāhi vītaye gṛṇāno havyadātaye |

6.016.10c ni hotā satsi barhiṣi ||

6.016.11a तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।

6.016.11c बृहच्छोचा यविष्ठ्य ॥

6.016.11a taṁ tvā samidbhir aṅgiro ghṛtena vardhayāmasi |

6.016.11c bṛhac chocā yaviṣṭhya ||

6.016.12a स नः पृथु श्रवाय्यमच्छा देव विवाससि ।

6.016.12c बृहदग्ने सुवीर्यम् ॥

6.016.12a sa naḥ pṛthu śravāyyam acchā deva vivāsasi |

6.016.12c bṛhad agne suvīryam ||

6.016.13a त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।

6.016.13c मूर्ध्नो विश्वस्य वाघतः ॥

6.016.13a tvām agne puṣkarād adhy atharvā nir amanthata |

6.016.13c mūrdhno viśvasya vāghataḥ ||

6.016.14a तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः ।

6.016.14c वृत्रहणं पुरंदरम् ॥

6.016.14a tam u tvā dadhyaṅṅ ṛṣiḥ putra īdhe atharvaṇaḥ |

6.016.14c vṛtrahaṇam purandaram ||

6.016.15a तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् ।

6.016.15c धनंजयं रणेरणे ॥

6.016.15a tam u tvā pāthyo vṛṣā sam idhe dasyuhantamam |
6.016.15c dhanañjayaṁ raṇe-raṇe ||

6.016.16a एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।

6.016.16c एभिर्वर्धास इन्दुभिः ॥

6.016.16a ehy ū ṣu bravāṇi te 'gna itthetarā giraḥ |
6.016.16c ebhir vardhāsa indubhiḥ ||

6.016.17a यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।

6.016.17c तत्रा सदः कृणवसे ॥

6.016.17a yatra kva ca te mano dakṣaṁ dadhasa uttaram |
6.016.17c tatrā sadaḥ kṛṇavase ||

6.016.18a नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो ।

6.016.18c अथा दुवो वनवसे ॥

6.016.18a nahi te pūrtam akṣipad bhuvan nemānāṁ vaso |
6.016.18c athā duvo vanavase ||

6.016.19a आग्निरगामि भारतो वृत्रहा पुरुचेतनः ।

6.016.19c दिवोदासस्य सत्पतिः ॥

6.016.19a āgnir agāmi bhārato vṛtrahā purucetanaḥ |
6.016.19c divodāsasya satpatiḥ ||

6.016.20a स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना ।

6.016.20c वन्वन्नवातो अस्तृतः ॥

6.016.20a sa hi viśvāti pārthivā rayiṁ dāśan mahitvanā |
6.016.20c vanvann avāto astṛtaḥ ||

6.016.21a स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता ।

6.016.21c बृहत्ततन्थ भानुना ॥

6.016.21a sa pratnavan navīyasāgne dyumnena saṁyatā |
6.016.21c bṛhat tatantha bhānunā ||

6.016.22a प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया ।

6.016.22c अर्च गाय च वेधसे ॥

6.016.22a pra vaḥ sakhāyo agnaye stomaṁ yajñaṁ ca dhṛṣṇuyā |
6.016.22c arca gāya ca vedhase ||

6.016.23a स हि यो मानुषा युगा सीदद्धोता कविक्रतुः ।

6.016.23c दूतश्च हव्यवाहनः ॥

6.016.23a sa hi yo mānuṣā yugā sīdad dhotā kavikratuḥ |
6.016.23c dūtaś ca havyavāhanaḥ ||

6.016.24a ता राजाना शुचिव्रतादित्यान्मारुतं गणम् ।

6.016.24c वसो यक्षीह रोदसी ॥

6.016.24a tā rājānā śucivratādityān mārutaṁ gaṇam |
6.016.24c vaso yakṣīha rodasī ||

6.016.25a वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय ।

6.016.25c ऊर्जो नपादमृतस्य ॥

6.016.25a vasvī te agne sandṛṣṭir iṣayate martyāya |
6.016.25c ūrjo napād amṛtasya ||

6.016.26a क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्सुरेक्णाः ।

6.016.26c मर्त आनाश सुवृक्तिम् ॥

6.016.26a kratvā dā astu śreṣṭho 'dya tvā vanvan sureknāḥ |
6.016.26c marta ānāśa suvṛktim ||

6.016.27a ते ते अग्ने त्वोता इषयन्तो विश्वमायुः ।

6.016.27c तरन्तो अर्यो अरातीर्वन्वन्तो अर्यो अरातीः ॥

6.016.27a te te agne tvotā iṣayanto viśvam āyuḥ |

6.016.27c taranto aryo arātīr vanvanto aryo arātīḥ ||

6.016.28a अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् ।

6.016.28c अग्निर्नो वनते रयिम् ॥

6.016.28a agnis tigmena śociṣā yāsad viśvaṁ ny a1triṇam |
6.016.28c agnir no vanate rayim ||

6.016.29a सुवीरं रयिमा भर जातवेदो विचर्षणे ।

6.016.29c जहि रक्षांसि सुक्रतो ॥

6.016.29a suvīraṁ rayim ā bhara jātavedo vicarṣaṇe |
6.016.29c jahi rakṣāṁsi sukrato ||

6.016.30a त्वं नः पाह्यंहसो जातवेदो अघायतः ।

6.016.30c रक्षा णो ब्रह्मणस्कवे ॥

6.016.30a tvaṁ naḥ pāhy aṁhaso jātavedo aghāyataḥ |
6.016.30c rakṣā ṇo brahmaṇas kave ||

6.016.31a यो नो अग्ने दुरेव आ मर्तो वधाय दाशति ।

6.016.31c तस्मान्नः पाह्यंहसः ॥

6.016.31a yo no agne dureva ā marto vadhāya dāśati |
6.016.31c tasmān naḥ pāhy aṁhasaḥ ||

6.016.32a त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम् ।

6.016.32c मर्तो यो नो जिघांसति ॥

6.016.32a tvaṁ taṁ deva jihvayā pari bādhasva duṣkṛtam |
6.016.32c marto yo no jighāṁsati ||

6.016.33a भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य ।

6.016.33c अग्ने वरेण्यं वसु ॥

6.016.33a bharadvājāya saprathaḥ śarma yaccha sahantya |
6.016.33c agne vareṇyaṁ vasu ||

6.016.34a अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।

6.016.34c समिद्धः शुक्र आहुतः ॥

6.016.34a agnir vṛtrāṇi jaṅghanad draviṇasyur vipanyayā |
6.016.34c samiddhaḥ śukra āhutaḥ ||

6.016.35a गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे ।

6.016.35c सीदन्नृतस्य योनिमा ॥

6.016.35a garbhe mātuḥ pituṣ pitā vididyutāno akṣare |
6.016.35c sīdann ṛtasya yonim ā ||

6.016.36a ब्रह्म प्रजावदा भर जातवेदो विचर्षणे ।

6.016.36c अग्ने यद्दीदयद्दिवि ॥

6.016.36a brahma prajāvad ā bhara jātavedo vicarṣaṇe |
6.016.36c agne yad dīdayad divi ||

6.016.37a उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत ।

6.016.37c अग्ने ससृज्महे गिरः ॥

6.016.37a upa tvā raṇvasandṛśam prayasvantaḥ sahaskṛta |
6.016.37c agne sasṛjmahe giraḥ ||

6.016.38a उप च्छायामिव घृणेरगन्म शर्म ते वयम् ।

6.016.38c अग्ने हिरण्यसंदृशः ॥

6.016.38a upa cchāyām iva ghṛṇer aganma śarma te vayam |
6.016.38c agne hiraṇyasandṛśaḥ ||

6.016.39a य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।

6.016.39c अग्ने पुरो रुरोजिथ ॥

6.016.39a ya ugra iva śaryahā tigmaśṛṅgo na vaṁsagaḥ |
6.016.39c agne puro rurojitha ||

6.016.40a आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति ।

6.016.40c विशामग्निं स्वध्वरम् ॥

6.016.40a ā yaṁ haste na khādinaṁ śiśuṁ jātaṁ na bibhrati |

6.016.40c viśām agniṁ svadhvaram ||

6.016.41a प्र देवं देववीतये भरता वसुवित्तमम् ।

6.016.41c आ स्वे योनौ नि षीदतु ॥

6.016.41a pra devaṁ devavītaye bharatā vasuvittamam |
6.016.41c ā sve yonau ni ṣīdatu ||

6.016.42a आ जातं जातवेदसि प्रियं शिशीतातिथिम् ।

6.016.42c स्योन आ गृहपतिम् ॥

6.016.42a ā jātaṁ jātavedasi priyaṁ śiśītātithim |
6.016.42c syona ā gṛhapatim ||

6.016.43a अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ।

6.016.43c अरं वहन्ति मन्यवे ॥

6.016.43a agne yukṣvā hi ye tavāśvāso deva sādhavaḥ |
6.016.43c araṁ vahanti manyave ||

6.016.44a अच्छा नो याह्या वहाभि प्रयांसि वीतये ।

6.016.44c आ देवान्सोमपीतये ॥

6.016.44a acchā no yāhy ā vahābhi prayāṁsi vītaye |
6.016.44c ā devān somapītaye ||

6.016.45a उदग्ने भारत द्युमदजस्रेण दविद्युतत् ।

6.016.45c शोचा वि भाह्यजर ॥

6.016.45a ud agne bhārata dyumad ajasreṇa davidyutat |
6.016.45c śocā vi bhāhy ajara ||

6.016.46a वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान् ।

6.016.46c होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत् ॥

6.016.46a vītī yo devam marto duvasyed agnim īḷītādhvare haviṣmān |
6.016.46c hotāraṁ satyayajaṁ rodasyor uttānahasto namasā vivāset ||

6.016.47a आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ।

6.016.47c ते ते भवन्तूक्षण ऋषभासो वशा उत ॥

6.016.47a ā te agna r̥cā havir hr̥dā taṣṭam bharāmasi ।
6.016.47c te te bhavantūkṣaṇa r̥ṣabhāso vaśā uta ॥

6.016.48a अग्निं देवासो अग्रियमिन्धते वृत्रहन्तमम् ।

6.016.48c येना वसून्याभृता तृळ्हा रक्षांसि वाजिना ॥

6.016.48a agniṁ devāso agriyam indhate vr̥trahantamam ।
6.016.48c yenā vasūny ābhr̥tā tr̥lhā rakṣāṁsi vājinā ॥

6.017.01a पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र ।

6.017.01c वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः ॥

6.017.01a pibā somam abhi yam ugra tarda ūrvaṁ gavyam mahi gr̥ṇāna indra ।
6.017.01c vi yo dhr̥ṣṇo vadhiṣo vajrahasta viśvā vr̥tram amitriyā śavobhiḥ ॥

6.017.02a स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् ।

6.017.02c यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥

6.017.02a sa īm pāhi ya r̥jīṣī tarutro yaḥ śipravān vr̥ṣabho yo matīnām ।
6.017.02c yo gotrabhid vajrabhr̥d yo hariṣṭhāḥ sa indra citrām̐ abhi tr̥ndhi vājān ॥

6.017.03a एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।

6.017.03c आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥

6.017.03a evā pāhi pratnathā mandatu tvā śrudhi brahma vāvr̥dhasvota gīrbhiḥ ।
6.017.03c āviḥ sūryaṁ kr̥ṇuhi pīpihīṣo jahi śatrūm̐r abhi gā indra tr̥ndhi ॥

6.017.04a ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।

6.017.04c महाममनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम् ॥

6.017.04a te tvā madā br̥had indra svadhāva ime pītā ukṣayanta dyumantam ।
6.017.04c mahām anūnaṁ tavasaṁ vibhūtim matsarāso jarhr̥ṣanta prasāham ॥

6.017.05a येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दृळ्हानि दर्द्रत् ।

6.017.05c महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात् ॥

6.017.05a yebhiḥ sūryam uṣasam mandasāno 'vāsayo 'pa dṛḷhāni dardrat |
6.017.05c mahām adrim pari gā indra santaṁ nutthā acyutaṁ sadasas pari svāt ||

6.017.06a तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः ।

6.017.06c और्णोर्दुर उस्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो अङ्गिरस्वान् ॥

6.017.06a tava kratvā tava tad daṁsanābhir āmāsu pakvaṁ śacyā ni dīdhaḥ |
6.017.06c aurṇor dura usriyābhyo vi dṛḷhod ūrvād gā asṛjo aṅgirasvān ||

6.017.07a पप्राथ क्षां महि दंसो व्युर्वीमुप द्यामृष्वो बृहदिन्द्र स्तभायः ।

6.017.07c अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥

6.017.07a paprātha kṣām mahi daṁso vy u1rvīm upa dyām ṛṣvo bṛhad indra stabhāyaḥ |
6.017.07c adhārayo rodasī devaputre pratne mātarā yahvī ṛtasya ||

6.017.08a अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय ।

6.017.08c अदेवो यदभ्यौहिष्ट देवान्स्वर्षाता वृणत इन्द्रमत्र ॥

6.017.08a adha tvā viśve pura indra devā ekaṁ tavasaṁ dadhire bharāya |
6.017.08c adevo yad abhy auhiṣṭa devān svarṣātā vṛṇata indram atra ||

6.017.09a अध द्यौश्चित्ते अप सा नु वज्राद्द्वितानमद्भियसा स्वस्य मन्योः ।

6.017.09c अहिं यदिन्द्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान ॥

6.017.09a adha dyauś cit te apa sā nu vajrād dvitānamad bhiyasā svasya manyoḥ |
6.017.09c ahiṁ yad indro abhy ohasānaṁ ni cid viśvāyuḥ śayathe jaghāna ||

6.017.10a अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृतच्छताश्रिम् ।

6.017.10c निकाममरमणसं येन नवन्तमहिं सं पिणगृजीषिन् ॥

6.017.10a adha tvaṣṭā te maha ugra vajraṁ sahasrabhṛṣṭiṁ vavṛtac chatāśrim |
6.017.10c nikāmam aramaṇasaṁ yena navantam ahiṁ sam piṇag ṛjīṣin ||

6.017.11a वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इन्द्र तुभ्यम् ।

6.017.11c पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमस्मै ॥

6.017.11a vardhān yaṁ viśve marutaḥ sajoṣāḥ pacac chatam mahiṣām̐ indra tubhyam |
6.017.11c pūṣā viṣṇus trīṇi sarāṁsi dhāvan vṛtrahaṇam madiram aṁśum asmai ||

6.017.12a आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम् ।

6.017.12c तासामनु प्रवत इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम् ॥

6.017.12a ā kṣodo mahi vṛtaṁ nadīnām pariṣṭhitam asṛja ūrmim apām |
6.017.12c tāsām anu pravata indra panthām prārdayo nīcīr apasaḥ samudram ||

6.017.13a एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।

6.017.13c सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥

6.017.13a evā tā viśvā cakṛvāṁsam indram mahām ugram ajuryaṁ sahodām |
6.017.13c suvīraṁ tvā svāyudhaṁ suvajram ā brahma navyam avase vavṛtyāt ||

6.017.14a स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।

6.017.14c भरद्वाजे नृवत इन्द्र सूरीन्दिवि च स्मैधि पार्ये न इन्द्र ॥

6.017.14a sa no vājāya śravasa iṣe ca rāye dhehi dyumata indra viprān |
6.017.14c bharadvāje nṛvata indra sūrīn divi ca smaidhi pārye na indra ||

6.017.15a अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥

6.017.15a ayā vājaṁ devahitaṁ sanema madema śatahimāḥ suvīrāḥ ||

6.018.01a तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः ।

6.018.01c अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनाम् ॥

6.018.01a tam u ṣṭuhi yo abhibhūtyojā vanvann avātaḥ puruhūta indraḥ |
6.018.01c aṣāḻham ugraṁ sahamānam ābhir gīrbhir vardha vṛṣabhaṁ carṣaṇīnām ||

6.018.02a स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।

6.018.02c बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥

6.018.02a sa yudhmaḥ satvā khajakṛt samadvā tuvimrakṣo nadanumām̐ ṛjīṣī |
6.018.02c bṛhadreṇuś cyavano mānuṣīṇām ekaḥ kṛṣṭīnām abhavat sahāvā ||

6.018.03a त्वं ह नु त्यददमायो दस्यूँरेकः कृष्टीरवनोरार्याय ।

6.018.03c अस्ति स्विन्नु वीर्यं१ तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ॥

6.018.03a tvaṁ ha nu tyad adamāyo dasyūm̐r ekaḥ kṛṣṭīr avanor āryāya |

6.018.03c asti svin nu vīryam1 tat ta indra na svid asti tad ṛtuthā vi vocaḥ ||

6.018.04a सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य ।

6.018.04c उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव ॥

6.018.04a sad id dhi te tuvijātasya manye sahaḥ sahiṣṭha turatas turasya |
6.018.04c ugram ugrasya tavasas tavīyo 'radhrasya radhraturo babhūva ||

6.018.05a तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।

6.018.05c हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥

6.018.05a tan naḥ pratnaṁ sakhyam astu yuṣme itthā vadadbhir valam aṅgirobhiḥ |
6.018.05c hann acyutacyud dasmeṣayantam ṛṇoḥ puro vi duro asya viśvāḥ ||

6.018.06a स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।

6.018.06c स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु ॥

6.018.06a sa hi dhībhir havyo asty ugra īśānakṛn mahati vṛtratūrye |
6.018.06c sa tokasātā tanaye sa vajrī vitantasāyyo abhavat samatsu ||

6.018.07a स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे ।

6.018.07c स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥

6.018.07a sa majmanā janima mānuṣāṇām amartyena nāmnāti pra sarsre |
6.018.07c sa dyumnena sa śavasota rāyā sa vīryeṇa nṛtamaḥ samokāḥ ||

6.018.08a स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च ।

6.018.08c वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥

6.018.08a sa yo na muhe na mithū jano bhūt sumantunāmā cumuriṁ dhuniṁ ca |
6.018.08c vṛṇak pipruṁ śambaraṁ śuṣṇam indraḥ purāṁ cyautnāya śayathāya nū cit ||

6.018.09a उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।

6.018.09c धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥

6.018.09a udāvatā tvakṣasā panyasā ca vṛtrahatyāya ratham indra tiṣṭha |
6.018.09c dhiṣva vajraṁ hasta ā dakṣiṇatrābhi pra manda purudatra māyāḥ ||

6.018.10a अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।

6.018.10c गम्भीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दम्भयच्च ॥

6.018.10a agnir na śuṣkaṁ vanam indra hetī rakṣo ni dhakṣy aśanir na bhīmā |
6.018.10c gambhīraya ṛṣvayā yo rurojādhvānayad duritā dambhayac ca ||

6.018.11a आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।

6.018.11c याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥

6.018.11a ā sahasram pathibhir indra rāyā tuvidyumna tuvivājebhir arvāk |
6.018.11c yāhi sūno sahaso yasya nū cid adeva īśe puruhūta yotoḥ ||

6.018.12a प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः ।

6.018.12c नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥

6.018.12a pra tuvidyumnasya sthavirasya ghṛṣver divo rarapśe mahimā pṛthivyāḥ |
6.018.12c nāsya śatrur na pratimānam asti na pratiṣṭhiḥ purumāyasya sahyoḥ ||

6.018.13a प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै ।

6.018.13c पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥

6.018.13a pra tat te adyā karaṇaṁ kṛtam bhūt kutsaṁ yad āyum atithigvam asmai |
6.018.13c purū sahasrā ni śiśā abhi kṣām ut tūrvayāṇaṁ dhṛṣatā ninetha ||

6.018.14a अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम् ।

6.018.14c करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥

6.018.14a anu tvāhighne adha deva devā madan viśve kavitamaṁ kavīnām |
6.018.14c karo yatra varivo bādhitāya dive janāya tanve gṛṇānaḥ ||

6.018.15a अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः ।

6.018.15c कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥

6.018.15a anu dyāvāpṛthivī tat ta ojo 'martyā jihata indra devāḥ |
6.018.15c kṛṣvā kṛtno akṛtaṁ yat te asty ukthaṁ navīyo janayasva yajñaiḥ ||

6.019.01a महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।

6.019.01c अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥

6.019.01a mahāṁ indro nṛvad ā carṣaṇiprā uta dvibarhā aminaḥ sahobhiḥ |
6.019.01c asmadryag vāvṛdhe vīryāyoruḥ pṛthuḥ sukṛtaḥ kartṛbhir bhūt ||

6.019.02a इन्द्रमेव धिषणा सातये धाद्बृहन्तमृष्वमजरं युवानम् ।

6.019.02c अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥

6.019.02a indram eva dhiṣaṇā sātaye dhād bṛhantam ṛṣvam ajaraṁ yuvānam |
6.019.02c aṣāḻhena śavasā śūśuvāṁsaṁ sadyaś cid yo vāvṛdhe asāmi ||

6.019.03a पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क्सं मिमीहि श्रवांसि ।

6.019.03c यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ॥

6.019.03a pṛthū karasnā bahulā gabhastī asmadrya1k sam mimīhi śravāṁsi |
6.019.03c yūtheva paśvaḥ paśupā damūnā asmāṁ indrābhy ā vavṛtsvājau ||

6.019.04a तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम ।

6.019.04c यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥

6.019.04a taṁ va indraṁ catinam asya śākair iha nūnaṁ vājayanto huvema |
6.019.04c yathā cit pūrve jaritāra āsur anedyā anavadyā ariṣṭāḥ ||

6.019.05a धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।

6.019.05c सं जग्मिरे पथ्या३ रायो अस्मिन्समुद्रे न सिन्धवो यादमानाः ॥

6.019.05a dhṛtavrato dhanadāḥ somavṛddhaḥ sa hi vāmasya vasunaḥ purukṣuḥ |
6.019.05c saṁ jagmire pathyā3 rāyo asmin samudre na sindhavo yādamānāḥ ||

6.019.06a शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।

6.019.06c विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥

6.019.06a śaviṣṭhaṁ na ā bhara śūra śava ojiṣṭham ojo abhibhūta ugram |
6.019.06c viśvā dyumnā vṛṣṇyā mānuṣāṇām asmabhyaṁ dā harivo mādayadhyai ||

6.019.07a यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।

6.019.07c येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥

6.019.07a yas te madaḥ pṛtanāṣāḻ amṛdhra indra taṁ na ā bhara śūśuvāṁsam |
6.019.07c yena tokasya tanayasya sātau maṁsīmahi jigīvāṁsas tvotāḥ ||

6.019.08a आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।

6.019.08c येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ॥

6.019.08a ā no bhara vṛṣaṇaṁ śuṣmam indra dhanaspṛtaṁ śūśuvāṁsaṁ sudakṣam ।
6.019.08c yena vaṁsāma pṛtanāsu śatrūn tavotibhir uta jāmīm̐r ajāmīn ॥

6.019.09a आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।

6.019.09c आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥

6.019.09a ā te śuṣmo vṛṣabha etu paścād ottarād adharād ā purastāt ।
6.019.09c ā viśvato abhi sam etv arvāṅ indra dyumnaṁ svarvad dhehy asme ॥

6.019.10a नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।

6.019.10c ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम् ॥

6.019.10a nṛvat ta indra nṛtamābhir ūtī vaṁsīmahi vāmaṁ śromatebhiḥ ।
6.019.10c īkṣe hi vasva ubhayasya rājan dhā ratnam mahi sthūram bṛhantam ॥

6.019.11a मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।

6.019.11c विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥

6.019.11a marutvantaṁ vṛṣabhaṁ vāvṛdhānam akavāriṁ divyaṁ śāsam indram ।
6.019.11c viśvāsāham avase nūtanāyograṁ sahodām iha taṁ huvema ॥

6.019.12a जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि ।

6.019.12c अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥

6.019.12a janaṁ vajrin mahi cin manyamānam ebhyo nṛbhyo randhayā yeṣv asmi ।
6.019.12c adhā hi tvā pṛthivyāṁ śūrasātau havāmahe tanaye goṣv apsu ॥

6.019.13a वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम ।

6.019.13c घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥

6.019.13a vayaṁ ta ebhiḥ puruhūta sakhyaiḥ śatroḥ-śatror uttara it syāma ।
6.019.13c ghnanto vṛtrāṇy ubhayāni śūra rāyā madema bṛhatā tvotāḥ ॥

6.020.01a द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान् ।

6.020.01c तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् ॥

6.020.01a dyaur na ya indrābhi bhūmāryas tasthau rayiḥ śavasā pṛtsu janān |
6.020.01c taṁ naḥ sahasrabharam urvarāsāṁ daddhi sūno sahaso vṛtraturam ||

6.020.02a दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम् ।

6.020.02c अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥

6.020.02a divo na tubhyam anv indra satrāsuryaṁ devebhir dhāyi viśvam |
6.020.02c ahiṁ yad vṛtram apo vavrivāṁsaṁ hann ṛjīṣin viṣṇunā sacānaḥ ||

6.020.03a तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः ।

6.020.03c राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत् ॥

6.020.03a tūrvann ojīyān tavasas tavīyān kṛtabrahmendro vṛddhamahāḥ |
6.020.03c rājābhavan madhunaḥ somyasya viśvāsāṁ yat purāṁ dartnum āvat ||

6.020.04a शतैरपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ।

6.020.04c वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥

6.020.04a śatair apadran paṇaya indrātra daśoṇaye kavaye 'rkasātau |
6.020.04c vadhaiḥ śuṣṇasyāśuṣasya māyāḥ pitvo nārirecīt kiṁ cana pra ||

6.020.05a महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।

6.020.05c उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ ॥

6.020.05a maho druho apa viśvāyu dhāyi vajrasya yat patane pādi śuṣṇaḥ |
6.020.05c uru ṣa sarathaṁ sārathaye kar indraḥ kutsāya sūryasya sātau ||

6.020.06a प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।

6.020.06c प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ॥

6.020.06a pra śyeno na madiram aṁśum asmai śiro dāsasya namucer mathāyan |
6.020.06c prāvan namīṁ sāpyaṁ sasantaṁ pṛṇag rāyā sam iṣā saṁ svasti ||

6.020.07a वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।

6.020.07c सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥

6.020.07a vi pipror ahimāyasya dṛlhāḥ puro vajriñ chavasā na dardaḥ |

6.020.07c sudāman tad rekṇo apramṛṣyam ṛjiśvane dātraṁ dāśuṣe dāḥ ||

6.020.08a स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः ।

6.020.08c आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥

6.020.08a sa vetasuṁ daśamāyaṁ daśoṇiṁ tūtujim indraḥ svabhiṣṭisumnaḥ |
6.020.08c ā tugraṁ śaśvad ibhaṁ dyotanāya mātur na sīm upa sṛjā iyadhyai ||

6.020.09a स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।

6.020.09c तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम् ॥

6.020.09a sa īṁ spṛdho vanate apratīto bibhrad vajraṁ vṛtrahaṇaṁ gabhastau |
6.020.09c tiṣṭhad dharī adhy asteva garte vacoyujā vahata indram ṛṣvam ||

6.020.10a सनेम तेऽवसा नव्य इन्द्र प्र पूरव स्तवन्त एना यज्ञैः ।

6.020.10c सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥

6.020.10a sanema te 'vasā navya indra pra pūrava stavanta enā yajñaiḥ |
6.020.10c sapta yat puraḥ śarma śāradīr dard dhan dāsīḥ purukutsāya śikṣan ||

6.020.11a त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ।

6.020.11c परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम् ॥

6.020.11a tvaṁ vṛdha indra pūrvyo bhūr varivasyann uśane kāvyāya |
6.020.11c parā navavāstvam anudeyam mahe pitre dadātha svaṁ napātam ||

6.020.12a त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।

6.020.12c प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥

6.020.12a tvaṁ dhunir indra dhunimatīr ṛṇor apaḥ sīrā na sravantīḥ |
6.020.12c pra yat samudram ati śūra parṣi pārayā turvaśaṁ yaduṁ svasti ||

6.020.13a तव ह त्यदिन्द्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।

6.020.13c दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्यर्कैः ॥

6.020.13a tava ha tyad indra viśvam ājau sasto dhunīcumurī yā ha siṣvap |
6.020.13c dīdayad it tubhyaṁ somebhiḥ sunvan dabhītir idhmabhṛtiḥ pakthy a1rkaiḥ ||

6.021.01a इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते ।

6.021.01c धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥

6.021.01a imā u tvā purutamasya kāror havyaṁ vīra havyā havante |
6.021.01c dhiyo ratheṣṭhām ajaraṁ navīyo rayir vibhūtir īyate vacasyā ||

6.021.02a तमु स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धम् ।

6.021.02c यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वम् ॥

6.021.02a tam u stuṣa indraṁ yo vidāno girvāhasaṁ gīrbhir yajñavṛddham |
6.021.02c yasya divam ati mahnā pṛthivyāḥ purumāyasya ririce mahitvam ||

6.021.03a स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।

6.021.03c कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ॥

6.021.03a sa it tamo 'vayunaṁ tatanvat sūryeṇa vayunavac cakāra |
6.021.03c kadā te martā amṛtasya dhāmeyakṣanto na minanti svadhāvaḥ ||

6.021.04a यस्ता चकार स कुह स्विदिन्द्रः कमा जनं चरति कासु विक्षु ।

6.021.04c कस्ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता ॥

6.021.04a yas tā cakāra sa kuha svid indraḥ kam ā janaṁ carati kāsu vikṣu |
6.021.04c kas te yajño manase śaṁ varāya ko arka indra katamaḥ sa hotā ||

6.021.05a इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः ।

6.021.05c ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥

6.021.05a idā hi te veviṣataḥ purājāḥ pratnāsa āsuḥ purukṛt sakhāyaḥ |
6.021.05c ye madhyamāsa uta nūtanāsa utāvamasya puruhūta bodhi ||

6.021.06a तं पृच्छन्तोऽवरासः पराणि प्रत्ना त इन्द्र श्रुत्यानु येमुः ।

6.021.06c अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम् ॥

6.021.06a tam pṛcchanto 'varāsaḥ parāṇi pratnā ta indra śrutyānu yemuḥ |
6.021.06c arcāmasi vīra brahmavāho yād eva vidma tāt tvā mahāntam ||

6.021.07a अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ।

6.021.07c तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥

6.021.07a abhi tvā pājo rakṣaso vi tasthe mahi jajñānam abhi tat su tiṣṭha |
6.021.07c tava pratnena yujyena sakhyā vajreṇa dhṛṣṇo apa tā nudasva ||

6.021.08a स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।

6.021.08c त्वं ह्या३पिः प्रदिवि पितृणां शश्वद्बभूथ सुहव एष्टौ ॥

6.021.08a sa tu śrudhīndra nūtanasya brahmaṇyato vīra kārudhāyaḥ |
6.021.08c tvaṁ hy ā3piḥ pradivi pitṝṇāṁ śaśvad babhūtha suhava eṣṭau ||

6.021.09a प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।

6.021.09c प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वताँश्च ॥

6.021.09a protaye varuṇam mitram indram marutaḥ kṛṣvāvase no adya |
6.021.09c pra pūṣaṇaṁ viṣṇum agnim purandhiṁ savitāram oṣadhīḥ parvatām̐ś ca ||

6.021.10a इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।

6.021.10c श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥

6.021.10a ima u tvā puruśāka prayajyo jaritāro abhy arcanty arkaiḥ |
6.021.10c śrudhī havam ā huvato huvāno na tvāvām̐ anyo amṛta tvad asti ||

6.021.11a नू म आ वाचमुप याहि विद्वान्विश्वेभिः सूनो सहसो यजत्रैः ।

6.021.11c ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥

6.021.11a nū ma ā vācam upa yāhi vidvān viśvebhiḥ sūno sahaso yajatraiḥ |
6.021.11c ye agnijihvā ṛtasāpa āsur ye manuṁ cakrur uparaṁ dasāya ||

6.021.12a स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः ।

6.021.12c ये अश्रमास उरवो वहिष्ठास्तेभिर्न इन्द्राभि वक्षि वाजम् ॥

6.021.12a sa no bodhi puraetā sugeṣūta durgeṣu pathikṛd vidānaḥ |
6.021.12c ye aśramāsa uravo vahiṣṭhās tebhir na indrābhi vakṣi vājam ||

6.022.01a य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।

6.022.01c यः पत्यते वृषभो वृष्ण्यावान्सत्यः सत्वा पुरुमायः सहस्वान् ॥

6.022.01a ya eka id dhavyaś carṣaṇīnām indraṁ taṁ gīrbhir abhy arca ābhiḥ |
6.022.01c yaḥ patyate vṛṣabho vṛṣṇyāvān satyaḥ satvā purumāyaḥ sahasvān ||

6.022.02a तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
6.022.02c नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥

6.022.02a tam u naḥ pūrve pitaro navagvāḥ sapta viprāso abhi vājayantaḥ |
6.022.02c nakṣaddābhaṁ taturim parvateṣṭhām adroghavācam matibhiḥ śaviṣṭham ||

6.022.03a तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
6.022.03c यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥

6.022.03a tam īmaha indram asya rāyaḥ puruvīrasya nṛvataḥ purukṣoḥ |
6.022.03c yo askṛdhoyur ajaraḥ svarvān tam ā bhara harivo mādayadhyai ||

6.022.04a तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिन्द्र ।
6.022.04c कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥

6.022.04a tan no vi voco yadi te purā cij jaritāra ānaśuḥ sumnam indra |
6.022.04c kas te bhāgaḥ kiṁ vayo dudhra khidvaḥ puruhūta purūvaso 'suraghnaḥ ||

6.022.05a तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः ।
6.022.05c तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥

6.022.05a tam pṛcchantī vajrahastaṁ ratheṣṭhām indraṁ vepī vakvarī yasya nū gīḥ |
6.022.05c tuvigrābhaṁ tuvikūrmiṁ rabhodāṁ gātum iṣe nakṣate tumram accha ||

6.022.06a अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
6.022.06c अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥

6.022.06a ayā ha tyam māyayā vāvṛdhānam manojuvā svatavaḥ parvatena |
6.022.06c acyutā cid vīḷitā svojo rujo vi dṛḷhā dhṛṣatā virapśin ||

6.022.07a तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।
6.022.07c स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि ॥

6.022.07a taṁ vo dhiyā navyasyā śaviṣṭham pratnam pratnavat paritaṁsayadhyai |
6.022.07c sa no vakṣad animānaḥ suvahmendro viśvāny ati durgahāṇi ||

6.022.08a आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा ।

6.022.08c तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च ॥

6.022.08a ā janāya druhvaṇe pārthivāni divyāni dīpayo 'ntarikṣā |
6.022.08c tapā vṛṣan viśvataḥ śociṣā tān brahmadviṣe śocaya kṣām apaś ca ||

6.022.09a भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।

6.022.09c धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥

6.022.09a bhuvo janasya divyasya rājā pārthivasya jagatas tveṣasandṛk |
6.022.09c dhiṣva vajraṁ dakṣiṇa indra haste viśvā ajurya dayase vi māyāḥ ||

6.022.10a आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम् ।

6.022.10c यया दासान्यार्याणि वृत्रा करो वज्रिन्सुतुका नाहुषाणि ॥

6.022.10a ā saṁyatam indra ṇaḥ svastiṁ śatrutūryāya bṛhatīm amṛdhrām |
6.022.10c yayā dāsāny āryāṇi vṛtrā karo vajrin sutukā nāhuṣāṇi ||

6.022.11a स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।

6.022.11c न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक् ॥

6.022.11a sa no niyudbhiḥ puruhūta vedho viśvavārābhir ā gahi prayajyo |
6.022.11c na yā adevo varate na deva ābhir yāhi tūyam ā madryadrik ||

6.023.01a सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।

6.023.01c यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥

6.023.01a suta it tvaṁ nimiśla indra some stome brahmaṇi śasyamāna ukthe |
6.023.01c yad vā yuktābhyām maghavan haribhyām bibhrad vajram bāhvor indra yāsi ||

6.023.02a यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ ।

6.023.02c यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून् ॥

6.023.02a yad vā divi pārye suṣvim indra vṛtrahatye 'vasi śūrasātau |
6.023.02c yad vā dakṣasya bibhyuṣo abibhyad arandhayaḥ śardhata indra dasyūn ||

6.023.03a पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती ।

6.023.03c कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित् ॥

6.023.03a pātā sutam indro astu somam praṇenīr ugro jaritāram ūtī |
6.023.03c kartā vīrāya suṣvaya u lokaṁ dātā vasu stuvate kīraye cit ||

6.023.04a गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।

6.023.04c कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणत स्तोमवाहाः ॥

6.023.04a ganteyānti savanā haribhyām babhrir vajram papiḥ somaṁ dadir gāḥ |
6.023.04c kartā vīraṁ naryaṁ sarvavīraṁ śrotā havaṁ gṛṇata stomavāhāḥ ||

6.023.05a अस्मै वयं यद्वावान तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः ।

6.023.05c सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥

6.023.05a asmai vayaṁ yad vāvāna tad viviṣma indrāya yo naḥ pradivo apas kaḥ |
6.023.05c sute some stumasi śaṁsad ukthendrāya brahma vardhanaṁ yathāsat ||

6.023.06a ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः ।

6.023.06c सुते सोमे सुतपाः शंतमानि राण्ड्या क्रियास्म वक्षणानि यज्ञैः ॥

6.023.06a brahmāṇi hi cakṛṣe vardhanāni tāvat ta indra matibhir viviṣmaḥ |
6.023.06c sute some sutapāḥ śantamāni rāṇḍyā kriyāsma vakṣaṇāni yajñaiḥ ||

6.023.07a स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिन्द्र ।

6.023.07c एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम् ॥

6.023.07a sa no bodhi puroḷāśaṁ rarāṇaḥ pibā tu somaṁ gorjīkam indra |
6.023.07c edam barhir yajamānasya sīdoruṁ kṛdhi tvāyata u lokam ||

6.023.08a स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवन्तु ।

6.023.08c प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः ॥

6.023.08a sa mandasvā hy anu joṣam ugra pra tvā yajñāsa ime aśnuvantu |
6.023.08c preme havāsaḥ puruhūtam asme ā tveyaṁ dhīr avasa indra yamyāḥ ||

6.023.09a तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम् ।

6.023.09c कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति ॥

6.023.09a taṁ vaḥ sakhāyaḥ saṁ yathā suteṣu somebhir īṁ pṛṇatā bhojam indram |

6.023.09c kuvit tasmā asati no bharāya na suṣvim indro 'vase mṛdhāti ||

6.023.10a एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।

6.023.10c असद्यथा जरित्र उत सूरिरिन्द्रो रायो विश्ववारस्य दाता ॥

6.023.10a eved indraḥ sute astāvi some bharadvājeṣu kṣayad in maghonaḥ |
6.023.10c asad yathā jaritra uta sūrir indro rāyo viśvavārasya dātā ||

6.024.01a वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।

6.024.01c अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः ॥

6.024.01a vṛṣā mada indre śloka ukthā sacā someṣu sutapā ṛjīṣī |
6.024.01c arcatryo maghavā nṛbhya ukthair dyukṣo rājā girām akṣitotiḥ ||

6.024.02a ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।

6.024.02c वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् ॥

6.024.02a taturir vīro naryo vicetāḥ śrotā havaṁ gṛṇata urvyūtiḥ |
6.024.02c vasuḥ śaṁso narāṁ kārudhāyā vājī stuto vidathe dāti vājam ||

6.024.03a अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः ।

6.024.03c वृक्षस्य नु ते पुरुहूत वया व्यू३तयो रुरुहुरिन्द्र पूर्वीः ॥

6.024.03a akṣo na cakryoḥ śūra bṛhan pra te mahnā ririce rodasyoḥ |
6.024.03c vṛkṣasya nu te puruhūta vayā vy ū3tayo ruruhur indra pūrvīḥ ||

6.024.04a शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।

6.024.04c वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन् ॥

6.024.04a śacīvatas te puruśāka śākā gavām iva srutayaḥ sañcaraṇīḥ |
6.024.04c vatsānāṁ na tantayas ta indra dāmanvanto adāmānaḥ sudāman ||

6.024.05a अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः ।

6.024.05c मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति ॥

6.024.05a anyad adya karvaram anyad u śvo 'sac ca san muhur ācakrir indraḥ |
6.024.05c mitro no atra varuṇaś ca pūṣāryo vaśasya paryetāsti ||

6.024.06a वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः ।

6.024.06c तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ॥

6.024.06a vi tvad āpo na parvatasya pṛṣṭhād ukthebhir indrānayanta yajñaiḥ |
6.024.06c taṁ tvābhiḥ suṣṭutibhir vājayanta ājiṁ na jagmur girvāho aśvāḥ ||

6.024.07a न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति ।

6.024.07c वृद्धस्य चिद्वर्धतामस्य तनू स्तोमेभिरुक्थैश्च शस्यमाना ॥

6.024.07a na yaṁ jaranti śarado na māsā na dyāva indram avakarśayanti |
6.024.07c vṛddhasya cid vardhatām asya tanū stomebhir ukthaiś ca śasyamānā ||

6.024.08a न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।

6.024.08c अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै ॥

6.024.08a na vīḻave namate na sthirāya na śardhate dasyujūtāya stavān |
6.024.08c ajrā indrasya girayaś cid ṛṣvā gambhīre cid bhavati gādham asmai ||

6.024.09a गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान् ।

6.024.09c स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम् ॥

6.024.09a gambhīreṇa na uruṇāmatrin preṣo yandhi sutapāvan vājān |
6.024.09c sthā ū ṣu ūrdhva ūtī ariṣaṇyann aktor vyuṣṭau paritakmyāyām ||

6.024.10a सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ।

6.024.10c अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥

6.024.10a sacasva nāyam avase abhīka ito vā tam indra pāhi riṣaḥ |
6.024.10c amā cainam araṇye pāhi riṣo madema śatahimāḥ suvīrāḥ ||

6.025.01a या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।

6.025.01c ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥

6.025.01a yā ta ūtir avamā yā paramā yā madhyamendra śuṣminn asti |
6.025.01c tābhir ū ṣu vṛtrahatye 'vīr na ebhiś ca vājair mahān na ugra ||

6.025.02a आभि स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र ।

6.025.02c आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः ॥

6.025.02a ābhi spṛdho mithatīr ariṣaṇyann amitrasya vyathayā manyum indra |
6.025.02c ābhir viśvā abhiyujo viṣūcīr āryāya viśo 'va tārīr dāsīḥ ||

6.025.03a इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे ।

6.025.03c त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ॥

6.025.03a indra jāmaya uta ye 'jāmayo 'rvācīnāso vanuṣo yuyujre |
6.025.03c tvam eṣāṁ vithurā śavāṁsi jahi vṛṣṇyāni kṛṇuhī parācaḥ ||

6.025.04a शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृण्वैते ।

6.025.04c तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते ॥

6.025.04a śūro vā śūraṁ vanate śarīrais tanūrucā taruṣi yat kṛṇvaite |
6.025.04c toke vā goṣu tanaye yad apsu vi krandasī urvarāsu bravaite ||

6.025.05a नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध ।

6.025.05c इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥

6.025.05a nahi tvā śūro na turo na dhṛṣṇur na tvā yodho manyamāno yuyodha |
6.025.05c indra nakiṣ ṭvā praty asty eṣāṁ viśvā jātāny abhy asi tāni ||

6.025.06a स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवन्ते ।

6.025.06c वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥

6.025.06a sa patyata ubhayor nṛmṇam ayor yadī vedhasaḥ samithe havante |
6.025.06c vṛtre vā maho nṛvati kṣaye vā vyacasvantā yadi vitantasaite ||

6.025.07a अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता ।

6.025.07c अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ॥

6.025.07a adha smā te carṣaṇayo yad ejān indra trātota bhavā varūtā |
6.025.07c asmākāso ye nṛtamāso arya indra sūrayo dadhire puro naḥ ||

6.025.08a अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।

6.025.08c अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥

6.025.08a anu te dāyi maha indriyāya satrā te viśvam anu vṛtrahatye |

6.025.08c anu kṣatram anu saho yajatrendra devebhir anu te nṛṣahye ||

6.025.09a एवा न स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः ।

6.025.09c विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ॥

6.025.09a evā na spṛdhaḥ sam ajā samatsv indra rārandhi mithatīr adevīḥ |
6.025.09c vidyāma vastor avasā gṛṇanto bharadvājā uta ta indra nūnam ||

6.026.01a श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।

6.026.01c सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥

6.026.01a śrudhī na indra hvayāmasi tvā maho vājasya sātau vāvṛṣāṇāḥ |
6.026.01c saṁ yad viśo 'yanta śūrasātā ugraṁ no 'vaḥ pārye ahan dāḥ ||

6.026.02a त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।

6.026.02c त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥

6.026.02a tvāṁ vājī havate vājineyo maho vājasya gadhyasya sātau |
6.026.02c tvāṁ vṛtreṣv indra satpatiṁ tarutraṁ tvāṁ caṣṭe muṣṭihā goṣu yudhyan ||

6.026.03a त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।

6.026.03c त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥

6.026.03a tvaṁ kaviṁ codayo 'rkasātau tvaṁ kutsāya śuṣṇaṁ dāśuṣe vark |
6.026.03c tvaṁ śiro amarmaṇaḥ parāhann atithigvāya śaṁsyaṁ kariṣyan ||

6.026.04a त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।

6.026.04c त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥

6.026.04a tvaṁ ratham pra bharo yodham ṛṣvam āvo yudhyantaṁ vṛṣabhaṁ daśadyum |
6.026.04c tvaṁ tugraṁ vetasave sacāhan tvaṁ tujiṁ gṛṇantam indra tūtoḥ ||

6.026.05a त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।

6.026.05c अव गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती ॥

6.026.05a tvaṁ tad uktham indra barhaṇā kaḥ pra yac chatā sahasrā śūra darṣi |
6.026.05c ava girer dāsaṁ śambaraṁ han prāvo divodāsaṁ citrābhir ūtī ||

6.026.06a त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये चुमुरिमिन्द्र सिष्वप् ।

6.026.06c त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन् ॥

6.026.06a tvaṁ śraddhābhir mandasānaḥ somair dabhītaye cumurim indra siṣvap |
6.026.06c tvaṁ rajim piṭhīnase daśasyan ṣaṣṭiṁ sahasrā śacyā sacāhan ||

6.026.07a अहं चन तत्सूरिभिरानश्यां तव ज्याय इन्द्र सुम्नमोजः ।

6.026.07c त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ ॥

6.026.07a ahaṁ cana tat sūribhir ānaśyāṁ tava jyāya indra sumnam ojaḥ |
6.026.07c tvayā yat stavante sadhavīra vīrās trivarūthena nahuṣā śaviṣṭha ||

6.026.08a वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।

6.026.08c प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम् ॥

6.026.08a vayaṁ te asyām indra dyumnahūtau sakhāyaḥ syāma mahina preṣṭhāḥ |
6.026.08c prātardaniḥ kṣatraśrīr astu śreṣṭho ghane vṛtrāṇāṁ sanaye dhanānām ||

6.027.01a किमस्य मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार ।

6.027.01c रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः ॥

6.027.01a kim asya made kim v asya pītāv indraḥ kim asya sakhye cakāra |
6.027.01c raṇā vā ye niṣadi kiṁ te asya purā vividre kim u nūtanāsaḥ ||

6.027.02a सदस्य मदे सद्वस्य पीताविन्द्रः सदस्य सख्ये चकार ।

6.027.02c रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥

6.027.02a sad asya made sad v asya pītāv indraḥ sad asya sakhye cakāra |
6.027.02c raṇā vā ye niṣadi sat te asya purā vividre sad u nūtanāsaḥ ||

6.027.03a नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म ।

6.027.03c न राधसोराधसो नूतनस्येन्द्र नकिर्ददृश इन्द्रियं ते ॥

6.027.03a nahi nu te mahimanaḥ samasya na maghavan maghavattvasya vidma |
6.027.03c na rādhaso-rādhaso nūtanasyendra nakir dadṛśa indriyaṁ te ||

6.027.04a एतत्त्यत्त इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः ।

6.027.04c वज्रस्य यत्ते निहतस्य शुष्मात्स्वनाच्चिदिन्द्र परमो ददार ॥

6.027.04a etat tyat ta indriyam aceti yenāvadhīr varaśikhasya śeṣaḥ |
6.027.04c vajrasya yat te nihatasya śuṣmāt svanāc cid indra paramo dadāra ||

6.027.05a वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन् ।

6.027.05c वृचीवतो यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥

6.027.05a vadhīd indro varaśikhasya śeṣo 'bhyāvartine cāyamānāya śikṣan |
6.027.05c vṛcīvato yad dhariyūpīyāyāṁ han pūrve ardhe bhiyasāparo dart ||

6.027.06a त्रिंशच्छतं वर्मिण इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।

6.027.06c वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन् ॥

6.027.06a triṁśacchataṁ varmiṇa indra sākaṁ yavyāvatyām puruhūta śravasyā |
6.027.06c vṛcīvantaḥ śarave patyamānāḥ pātrā bhindānā nyarthāny āyan ||

6.027.07a यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा ।

6.027.07c स सृञ्जयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन् ॥

6.027.07a yasya gāvāv aruṣā sūyavasyū antar ū ṣu carato rerihāṇā |
6.027.07c sa sṛñjayāya turvaśam parādād vṛcīvato daivavātāya śikṣan ||

6.027.08a द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।

6.027.08c अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥

6.027.08a dvayāṁ agne rathino viṁśatiṁ gā vadhūmato maghavā mahyaṁ samrāṭ |
6.027.08c abhyāvartī cāyamāno dadāti dūṇāśeyaṁ dakṣiṇā pārthavānām ||

6.028.01a आ गावो अग्मन्नुत भद्रमक्रन्सीदन्तु गोष्ठे रणयन्त्वस्मे ।

6.028.01c प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥

6.028.01a ā gāvo agmann uta bhadram akran sīdantu goṣṭhe raṇayantv asme |
6.028.01c prajāvatīḥ pururūpā iha syur indrāya pūrvīr uṣaso duhānāḥ ||

6.028.02a इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।

6.028.02c भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥

6.028.02a indro yajvane pṛṇate ca śikṣaty uped dadāti na svam muṣāyati |
6.028.02c bhūyo-bhūyo rayim id asya vardhayann abhinne khilye ni dadhāti devayum ||

6.028.03a न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
6.028.03c देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥

6.028.03a na tā naśanti na dabhāti taskaro nāsām āmitro vyathir ā dadharṣati |
6.028.03c devāṁś ca yābhir yajate dadāti ca jyog it tābhiḥ sacate gopatiḥ saha ||

6.028.04a न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
6.028.04c उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥

6.028.04a na tā arvā reṇukakāṭo aśnute na saṁskṛtatram upa yanti tā abhi |
6.028.04c urugāyam abhayaṁ tasya tā anu gāvo martasya vi caranti yajvanaḥ ||

6.028.05a गावो भगो गाव इन्द्रो मे अच्छान्गावः सोमस्य प्रथमस्य भक्षः ।
6.028.05c इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥

6.028.05a gāvo bhago gāva indro me acchān gāvaḥ somasya prathamasya bhakṣaḥ |
6.028.05c imā yā gāvaḥ sa janāsa indra icchāmīd dhṛdā manasā cid indram ||

6.028.06a यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
6.028.06c भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥

6.028.06a yūyaṁ gāvo medayathā kṛśaṁ cid aśrīraṁ cit kṛṇuthā supratīkam |
6.028.06c bhadraṁ gṛhaṁ kṛṇutha bhadravāco bṛhad vo vaya ucyate sabhāsu ||

6.028.07a प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
6.028.07c मा व स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥

6.028.07a prajāvatīḥ sūyavasaṁ riśantīḥ śuddhā apaḥ suprapāṇe pibantīḥ |
6.028.07c mā va stena īśata māghaśaṁsaḥ pari vo hetī rudrasya vṛjyāḥ ||

6.028.08a उपेदमुपपर्चनमासु गोषूप पृच्यताम् ।
6.028.08c उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥

6.028.08a upedam upaparcanam āsu goṣūpa pṛcyatām |
6.028.08c upa ṛṣabhasya retasy upendra tava vīrye ||

6.029.01a इन्द्रं वो नरः सख्याय सेपुर्महो यन्तः सुमतये चकानाः ।

6.029.01c महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम् ॥

6.029.01a indram vo naraḥ sakhyāya sepur maho yantaḥ sumataye cakānāḥ |
6.029.01c maho hi dātā vajrahasto asti mahām u raṇvam avase yajadhvam ||

6.029.02a आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः ।

6.029.02c आ रश्मयो गभस्त्यो स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥

6.029.02a ā yasmin haste naryā mimikṣur ā rathe hiraṇyayeratheṣṭhāḥ |
6.029.02c ā raśmayo gabhastyo sthūrayor ādhvann aśvāso vṛṣaṇo yujānāḥ ||

6.029.03a श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान् ।

6.029.03c वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नृतविषिरो बभूथ ॥

6.029.03a śriye te pādā duva ā mimikṣur dhṛṣṇur vajrī śavasā dakṣiṇāvān |
6.029.03c vasāno atkam surabhim dṛśe kam sva1r ṇa nṛtav iṣiro babhūtha ||

6.029.04a स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते सन्ति धानाः ।

6.029.04c इन्द्रं नर स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः ॥

6.029.04a sa soma āmiślatamaḥ suto bhūd yasmin paktiḥ pacyate santi dhānāḥ |
6.029.04c indram nara stuvanto brahmakārā ukthā śamsanto devavātatamāḥ ||

6.029.05a न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा ।

6.029.05c आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ॥

6.029.05a na te antaḥ śavaso dhāyy asya vi tu bābadhe rodasī mahitvā |
6.029.05c ā tā sūriḥ pṛṇati tūtujāno yūthevāpsu samījamāna ūtī ||

6.029.06a एवेदिन्द्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा ।

6.029.06c एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥

6.029.06a eved indraḥ suhava ṛṣvo astūtī anūtī hiriśipraḥ satvā |
6.029.06c evā hi jāto asamātyojāḥ purū ca vṛtrā hanati ni dasyūn ||

6.030.01a भूय इद्वावृधे वीर्याँ एको अजुर्यो दयते वसूनि ।

6.030.01c प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥

6.030.01a bhūya id vāvṛdhe vīryāyam̐ eko ajuryo dayate vasūni |
6.030.01c pra ririce diva indraḥ pṛthivyā ardham id asya prati rodasī ubhe ||

6.030.02a अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति ।

6.030.02c दिवेदिवे सूर्यो दर्शतो भूद्वि सद्मान्युर्विया सुक्रतुर्धात् ॥

6.030.02a adhā manye bṛhad asuryam asya yāni dādhāra nakir ā mināti |
6.030.02c dive-dive sūryo darśato bhūd vi sadmāny urviyā sukratur dhāt ||

6.030.03a अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र ।

6.030.03c नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि ॥

6.030.03a adyā cin nū cit tad apo nadīnāṁ yad ābhyo arado gātum indra |
6.030.03c ni parvatā admasado na sedus tvayā dṛlhāni sukrato rajāṁsi ||

6.030.04a सत्यमित्तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान् ।

6.030.04c अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम् ॥

6.030.04a satyam it tan na tvāvām̐ anyo astīndra devo na martyo jyāyān |
6.030.04c ahann ahim pariśayānam arṇo 'vāsṛjo apo acchā samudram ||

6.030.05a त्वमपो वि दुरो विषूचीरिन्द्र दृळ्हमरुजः पर्वतस्य ।

6.030.05c राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासम् ॥

6.030.05a tvam apo vi duro viṣūcīr indra dṛlham arujaḥ parvatasya |
6.030.05c rājābhavo jagataś carṣaṇīnāṁ sākaṁ sūryaṁ janayan dyām uṣāsam ||

6.031.01a अभूरेको रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः ।

6.031.01c वि तोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः ॥

6.031.01a abhūr eko rayipate rayīṇām ā hastayor adhithā indra kṛṣṭīḥ |
6.031.01c vi toke apsu tanaye ca sūre 'vocanta carṣaṇayo vivācaḥ ||

6.031.02a त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि ।

6.031.02c द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते ॥

6.031.02a tvad bhiyendra pārthivāni viśvācyutā cic cyāvayante rajāṁsi |
6.031.02c dyāvākṣāmā parvatāso vanāni viśvaṁ dṛḷham bhayate ajmann ā te ||

6.031.03a त्वं कुत्सेनाभि शुष्णमिन्द्राशुषं युध्य कुयवं गविष्टौ ।
6.031.03c दश प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥

6.031.03a tvaṁ kutsenābhi śuṣṇam indrāśuṣaṁ yudhya kuyavaṁ gaviṣṭau |
6.031.03c daśa prapitve adha sūryasya muṣāyaś cakram avive rapāṁsi ||

6.031.04a त्वं शतान्यव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः ।
6.031.04c अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥

6.031.04a tvaṁ śatāny ava śambarasya puro jaghanthāpratīni dasyoḥ |
6.031.04c aśikṣo yatra śacyā śacīvo divodāsāya sunvate sutakre bharadvājāya gṛṇate vasūni ||

6.031.05a स सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम् ।
6.031.05c याहि प्रपथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥

6.031.05a sa satyasatvan mahate raṇāya ratham ā tiṣṭha tuvinṛmṇa bhīmam |
6.031.05c yāhi prapathinn avasopa madrik pra ca śruta śrāvaya carṣaṇibhyaḥ ||

6.032.01a अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
6.032.01c विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् ॥

6.032.01a apūrvyā purutamāny asmai mahe vīrāya tavase turāya |
6.032.01c virapśine vajriṇe śantamāni vacāṁsy āsā sthavirāya takṣam ||

6.032.02a स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः ।
6.032.02c स्वाधीभिरृक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम् ॥

6.032.02a sa mātarā sūryeṇā kavīnām avāsayad rujad adriṁ gṛṇānaḥ |
6.032.02c svādhībhir ṛkvabhir vāvaśāna ud usriyāṇām asṛjan nidānam ||

6.032.03a स वह्निभिरृक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
6.032.03c पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन् ॥

6.032.03a sa vahnibhir ṛkvabhir goṣu śaśvan mitajñubhiḥ purukṛtvā jigāya |
6.032.03c puraḥ purohā sakhibhiḥ sakhīyan dṛḷhā ruroja kavibhiḥ kaviḥ san ||

6.032.04a स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।

6.032.04c पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि ॥

6.032.04a sa nīvyābhir jaritāram acchā maho vājebhir mahadbhiś ca śuṣmaiḥ |
6.032.04c puruvīrābhir vṛṣabha kṣitīnām ā girvaṇaḥ suvitāya pra yāhi ||

6.032.05a स सर्गेण शवसा तक्तो अत्यैरप इन्द्रो दक्षिणतस्तुराषाट् ।

6.032.05c इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ॥

6.032.05a sa sargeṇa śavasā takto atyair apa indro dakṣiṇatas turāṣāṭ |
6.032.05c itthā sṛjānā anapāvṛd arthaṁ dive-dive viviṣur apramṛṣyam ||

6.033.01a य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्स्वभिष्टिर्दास्वान् ।

6.033.01c सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान् ॥

6.033.01a ya ojiṣṭha indra taṁ su no dā mado vṛṣan svabhiṣṭir dāsvān |
6.033.01c sauvaśvyaṁ yo vanavat svaśvo vṛtrā samatsu sāsahad amitrān ||

6.033.02a त्वां ही३न्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ ।

6.033.02c त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा ॥

6.033.02a tvāṁ hī3ndrāvase vivāco havante carṣaṇayaḥ śūrasātau |
6.033.02c tvaṁ viprebhir vi paṇīm̐r aśāyas tvota it sanitā vājam arvā ||

6.033.03a त्वं ताँ इन्द्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर ।

6.033.03c वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम ॥

6.033.03a tvaṁ tām̐ indrobhayām̐ amitrān dāsā vṛtrāṇy āryā ca śūra |
6.033.03c vadhīr vaneva sudhitebhir atkair ā pṛtsu darṣi nṛṇāṁ nṛtama ||

6.033.04a स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः ।

6.033.04c स्वर्षाता यद्ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ॥

6.033.04a sa tvaṁ na indrākavābhir ūtī sakhā viśvāyur avitā vṛdhe bhūḥ |
6.033.04c svarṣātā yad dhvayāmasi tvā yudhyanto nemadhitā pṛtsu śūra ||

6.033.05a नूनं न इन्द्रापराय च स्या भवा मृळीक उत नो अभिष्टौ ।

6.033.05c इत्था गृणन्तो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः ॥

6.033.05a nūnaṁ na indrāparāya ca syā bhavā mṛlīka uta no abhiṣṭau |
6.033.05c itthā gṛṇanto mahinasya śarman divi ṣyāma pārye goṣatamāḥ ||

6.034.01a सं च त्वे जग्मुर्गिर इन्द्र पूर्वीर्वि च त्वद्यन्ति विभ्वो मनीषाः ।

6.034.01c पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का ॥

6.034.01a saṁ ca tve jagmur gira indra pūrvīr vi ca tvad yanti vibhvo manīṣāḥ |
6.034.01c purā nūnaṁ ca stutaya ṛṣīṇām paspṛdhra indre adhy ukthārkā ||

6.034.02a पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।

6.034.02c रथो न महे शवसे युजानो३ऽस्माभिरिन्द्रो अनुमाद्यो भूत् ॥

6.034.02a puruhūto yaḥ purugūrta ṛbhvāṁ ekaḥ purupraśasto asti yajñaiḥ |
6.034.02c ratho na mahe śavase yujāno3 'smābhir indro anumādyo bhūt ||

6.034.03a न यं हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः ।

6.034.03c यदि स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै ॥

6.034.03a na yaṁ hiṁsanti dhītayo na vāṇīr indraṁ nakṣantīd abhi vardhayantīḥ |
6.034.03c yadi stotāraḥ śataṁ yat sahasraṁ gṛṇanti girvaṇasaṁ śaṁ tad asmai ||

6.034.04a अस्मा एतद्दिव्य१र्चेव मासा मिमिक्ष इन्द्रे न्ययामि सोमः ।

6.034.04c जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥

6.034.04a asmā etad divy a1rceva māsā mimikṣa indre ny ayāmi somaḥ |
6.034.04c janaṁ na dhanvann abhi saṁ yad āpaḥ satrā vāvṛdhur havanāni yajñaiḥ ||

6.034.05a अस्मा एतन्मह्याङ्गूषमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि ।

6.034.05c असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च ॥

6.034.05a asmā etan mahy āṅgūṣam asmā indrāya stotram matibhir avāci |
6.034.05c asad yathā mahati vṛtratūrya indro viśvāyur avitā vṛdhaś ca ||

6.035.01a कदा भुवन्रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।

6.035.01c कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥

6.035.01a kadā bhuvan rathakṣayāṇi brahma kadā stotre sahasrapoṣyaṁ dāḥ |
6.035.01c kadā stomaṁ vāsayo 'sya rāyā kadā dhiyaḥ karasi vājaratnāḥ ||

6.035.02a कर्हि स्वित्तदिन्द्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन् ।

6.035.02c त्रिधातु गा अधि जयासि गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥

6.035.02a karhi svit tad indra yan nṛbhir nṝn vīrair vīrān nīḷayāse jayājīn |
6.035.02c tridhātu gā adhi jayāsi goṣv indra dyumnaṁ svarvad dhehy asme ||

6.035.03a कर्हि स्वित्तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।

6.035.03c कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥

6.035.03a karhi svit tad indra yaj jaritre viśvapsu brahma kṛṇavaḥ śaviṣṭha |
6.035.03c kadā dhiyo na niyuto yuvāse kadā gomaghā havanāni gacchāḥ ||

6.035.04a स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः ।

6.035.04c पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥

6.035.04a sa gomaghā jaritre aśvaścandrā vājaśravaso adhi dhehi pṛkṣaḥ |
6.035.04c pīpihīṣaḥ sudughām indra dhenum bharadvājeṣu suruco rurucyāḥ ||

6.035.05a तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे ।

6.035.05c मा निररं शुक्रदुघस्य धेनोराङ्गिरसान्ब्रह्मणा विप्र जिन्व ॥

6.035.05a tam ā nūnaṁ vṛjanam anyathā cic chūro yac chakra vi duro gṛṇīṣe |
6.035.05c mā nir araṁ śukradughasya dhenor āṅgirasān brahmaṇā vipra jinva ||

6.036.01a सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।

6.036.01c सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम् ॥

6.036.01a satrā madāsas tava viśvajanyāḥ satrā rāyo 'dha ye pārthivāsaḥ |
6.036.01c satrā vājānām abhavo vibhaktā yad deveṣu dhārayathā asuryam ||

6.036.02a अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।

6.036.02c स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये ॥

6.036.02a anu pra yeje jana ojo asya satrā dadhire anu vīryāya |
6.036.02c syūmagṛbhe dudhaye 'rvate ca kratuṁ vṛñjanty api vṛtrahatye ||

6.036.03a तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम् ।

6.036.03c समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ॥

6.036.03a taṁ sadhrīcīr ūtayo vṛṣṇyāni pauṁsyāni niyutaḥ saścur indram |
6.036.03c samudraṁ na sindhava ukthaśuṣmā uruvyacasaṁ gira ā viśanti ||

6.036.04a स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।

6.036.04c पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ॥

6.036.04a sa rāyas khām upa sṛjā gṛṇānaḥ puruścandrasya tvam indra vasvaḥ |
6.036.04c patir babhūthāsamo janānām eko viśvasya bhuvanasya rājā ||

6.036.05a स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः ।

6.036.05c असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ॥

6.036.05a sa tu śrudhi śrutyā yo duvoyur dyaur na bhūmābhi rāyo aryaḥ |
6.036.05c aso yathā naḥ śavasā cakāno yuge-yuge vayasā cekitānaḥ ||

6.037.01a अर्वाग्रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु ।

6.037.01c कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥

6.037.01a arvāg rathaṁ viśvavāraṁ ta ugrendra yuktāso harayo vahantu |
6.037.01c kīriś cid dhi tvā havate svarvān ṛdhīmahi sadhamādas te adya ||

6.037.02a प्रो द्रोणे हरयः कर्माग्मन्पुनानास ऋज्यन्तो अभूवन् ।

6.037.02c इन्द्रो नो अस्य पूर्व्यः पपीयाद्द्युक्षो मदस्य सोम्यस्य राजा ॥

6.037.02a pro droṇe harayaḥ karmāgman punānāsa ṛjyanto abhūvan |
6.037.02c indro no asya pūrvyaḥ papīyād dyukṣo madasya somyasya rājā ||

6.037.03a आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।

6.037.03c अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥

6.037.03a āsasrāṇāsaḥ śavasānam acchendraṁ sucakre rathyāso aśvāḥ |
6.037.03c abhi śrava ṛjyanto vaheyur nū cin nu vāyor amṛtaṁ vi dasyet ||

6.037.04a वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः ।

6.037.04c यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन् ॥

6.037.04a variṣṭho asya dakṣiṇām iyartīndro maghonāṁ tuvikūrmitamaḥ |
6.037.04c yayā vajrivaḥ pariyāsy aṁho maghā ca dhṛṣṇo dayase vi sūrīn ||

6.037.05a इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर्वर्धतां वृद्धमहाः ।

6.037.05c इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥

6.037.05a indro vājasya sthavirasya dātendro gīrbhir vardhatāṁ vṛddhamahāḥ |
6.037.05c indro vṛtraṁ haniṣṭho astu satvā tā sūriḥ pṛṇati tūtujānaḥ ||

6.038.01a अपादित उदु नश्चित्रतमो महीं भर्षद्द्युमतीमिन्द्रहूतिम् ।

6.038.01c पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते सुदानुः ॥

6.038.01a apād ita ud u naś citratamo mahīm bharṣad dyumatīm indrahūtim |
6.038.01c panyasīṁ dhītiṁ daivyasya yāmañ janasya rātiṁ vanate sudānuḥ ||

6.038.02a दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः ।

6.038.02c एयमेनं देवहूतिर्ववृत्यान्मद्र्य१गिन्द्रमियमृच्यमाना ॥

6.038.02a dūrāc cid ā vasato asya karṇā ghoṣād indrasya tanyati bruvāṇaḥ |
6.038.02c eyam enaṁ devahūtir vavṛtyān madrya1g indram iyam ṛcyamānā ||

6.038.03a तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।

6.038.03c ब्रह्मा च गिरो दधिरे समस्मिन्महाँश्च स्तोमो अधि वर्धदिन्द्रे ॥

6.038.03a taṁ vo dhiyā paramayā purājām ajaram indram abhy anūṣy arkaiḥ |
6.038.03c brahmā ca giro dadhire sam asmin mahām̐ś ca stomo adhi vardhad indre ||

6.038.04a वर्धाद्यं यज्ञ उत सोम इन्द्रं वर्धाद्ब्रह्म गिर उक्था च मन्म ।

6.038.04c वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इन्द्रम् ॥

6.038.04a vardhād yaṁ yajña uta soma indraṁ vardhād brahma gira ukthā ca manma |
6.038.04c vardhāhainam uṣaso yāmann aktor vardhān māsāḥ śarado dyāva indram ||

6.038.05a एवा जज्ञानं सहसे असामि वावृधानं राधसे च श्रुताय ।

6.038.05c महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु ॥

6.038.05a evā jajñānaṁ sahase asāmi vāvṛdhānaṁ rādhase ca śrutāya |
6.038.05c mahām ugram avase vipra nūnam ā vivāsema vṛtratūryeṣu ||

6.039.01a मन्द्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य मध्वः ।

6.039.01c अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥

6.039.01a mandrasya kaver divyasya vahner vipramanmano vacanasya madhvaḥ |
6.039.01c apā nas tasya sacanasya deveṣo yuvasva gṛṇate goagrāḥ ||

6.039.02a अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः ।

6.039.02c रुजदरुग्णं वि वलस्य सानुं पणीँर्वचोभिरभि योधदिन्द्रः ॥

6.039.02a ayam uśānaḥ pary adrim usrā ṛtadhītibhir ṛtayug yujānaḥ |
6.039.02c rujad arugṇaṁ vi valasya sānuṁ paṇīm̐r vacobhir abhi yodhad indraḥ ||

6.039.03a अयं द्योतयदद्युतो व्य१क्तून्दोषा वस्तोः शरद इन्दुरिन्द्र ।

6.039.03c इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥

6.039.03a ayaṁ dyotayad adyuto vy a1ktūn doṣā vastoḥ śarada indur indra |
6.039.03c imaṁ ketum adadhur nū cid ahnāṁ śucijanmana uṣasaś cakāra ||

6.039.04a अयं रोचयदरुचो रुचानो३ऽयं वासयद्व्यृ१तेन पूर्वीः ।

6.039.04c अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥

6.039.04a ayaṁ rocayad aruco rucāno3 'yaṁ vāsayad vy ṛ1tena pūrvīḥ |
6.039.04c ayam īyata ṛtayugbhir aśvaiḥ svarvidā nābhinā carṣaṇiprāḥ ||

6.039.05a नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः ।

6.039.05c अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ॥

6.039.05a nū gṛṇāno gṛṇate pratna rājann iṣaḥ pinva vasudeyāya pūrvīḥ |
6.039.05c apa oṣadhīr aviṣā vanāni gā arvato nṝn ṛcase rirīhi ||

6.040.01a इन्द्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखाया ।

6.040.01c उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥

6.040.01a indra piba tubhyaṁ suto madāyāva sya harī vi mucā sakhāyā |

6.040.01c uta pra gāya gaṇa ā niṣadyāthā yajñāya gṛṇate vayo dhāḥ ||

6.040.02a अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन् ।

6.040.02c तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन्पीतये समस्मै ॥

6.040.02a asya piba yasya jajñāna indra madāya kratve apibo virapśin |

6.040.02c tam u te gāvo nara āpo adrir induṁ sam ahyan pītaye sam asmai ||

6.040.03a समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।

6.040.03c त्वायता मनसा जोहवीमीन्द्रा याहि सुविताय महे नः ॥

6.040.03a samiddhe agnau suta indra soma ā tvā vahantu harayo vahiṣṭhāḥ |

6.040.03c tvāyatā manasā johavīmīndrā yāhi suvitāya mahe naḥ ||

6.040.04a आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम् ।

6.040.04c उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ॥

6.040.04a ā yāhi śaśvad uśatā yayāthendra mahā manasā somapeyam |

6.040.04c upa brahmāṇi śṛṇava imā no 'thā te yajñas tanve3 vayo dhāt ||

6.040.05a यदिन्द्र दिवि पार्ये यदृधग्यद्वा स्वे सदने यत्र वासि ।

6.040.05c अतो नो यज्ञमवसे नियुत्वान्सजोषाः पाहि गिर्वणो मरुद्भिः ॥

6.040.05a yad indra divi pārye yad ṛdhag yad vā sve sadane yatra vāsi |

6.040.05c ato no yajñam avase niyutvān sajoṣāḥ pāhi girvaṇo marudbhiḥ ||

6.041.01a अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।

6.041.01c गावो न वज्रिन्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥

6.041.01a aheḷamāna upa yāhi yajñaṁ tubhyam pavanta indavaḥ sutāsaḥ |

6.041.01c gāvo na vajrin svam oko acchendrā gahi prathamo yajñiyānām ||

6.041.02a या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम् ।

6.041.02c तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥

6.041.02a yā te kākut sukṛtā yā variṣṭhā yayā śaśvat pibasi madhva ūrmim |
6.041.02c tayā pāhi pra te adhvaryur asthāt saṁ te vajro vartatām indra gavyuḥ ||

6.041.03a एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः ।

6.041.03c एतं पिब हरिव स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ॥

6.041.03a eṣa drapso vṛṣabho viśvarūpa indrāya vṛṣṇe sam akāri somaḥ |
6.041.03c etam piba hariva sthātar ugra yasyeśiṣe pradivi yas te annam ||

6.041.04a सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय ।

6.041.04c एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ॥

6.041.04a sutaḥ somo asutād indra vasyān ayaṁ śreyāñ cikituṣe raṇāya |
6.041.04c etaṁ titirva upa yāhi yajñaṁ tena viśvās taviṣīr ā pṛṇasva ||

6.041.05a ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति ।

6.041.05c शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ॥

6.041.05a hvayāmasi tvendra yāhy arvāṅ araṁ te somas tanve bhavāti |
6.041.05c śatakrato mādayasvā suteṣu prāsmām̐ ava pṛtanāsu pra vikṣu ||

6.042.01a प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।

6.042.01c अरंगमाय जग्मयेऽपश्चाद्दघ्वने नरे ॥

6.042.01a praty asmai pipīṣate viśvāni viduṣe bhara |
6.042.01c araṅgamāya jagmaye 'paścāddaghvane nare ||

6.042.02a एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।

6.042.02c अमत्रेभिरृजीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥

6.042.02a em enam pratyetana somebhiḥ somapātamam |
6.042.02c amatrebhir ṛjīṣiṇam indraṁ sutebhir indubhiḥ ||

6.042.03a यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।

6.042.03c वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते ॥

6.042.03a yadī sutebhir indubhiḥ somebhiḥ pratibhūṣatha |
6.042.03c vedā viśvasya medhiro dhṛṣat taṁ-tam id eṣate ||

6.042.04a अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।

6.042.04c कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥

6.042.04a asmā-asmā id andhaso 'dhvaryo pra bharā sutam |
6.042.04c kuvit samasya jenyasya śardhato 'bhiśaster avasparat ||

6.043.01a यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः ।

6.043.01c अयं स सोम इन्द्र ते सुतः पिब ॥

6.043.01a yasya tyac chambaram made divodāsāya randhayaḥ |
6.043.01c ayaṁ sa soma indra te sutaḥ piba ||

6.043.02a यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे ।

6.043.02c अयं स सोम इन्द्र ते सुतः पिब ॥

6.043.02a yasya tīvrasutam madam madhyam antaṁ ca rakṣase |
6.043.02c ayaṁ sa soma indra te sutaḥ piba ||

6.043.03a यस्य गा अन्तरश्मनो मदे दृळ्हा अवासृजः ।

6.043.03c अयं स सोम इन्द्र ते सुतः पिब ॥

6.043.03a yasya gā antar aśmano made dṛḷhā avāsṛjaḥ |
6.043.03c ayaṁ sa soma indra te sutaḥ piba ||

6.043.04a यस्य मन्दानो अन्धसो माघोनं दधिषे शवः ।

6.043.04c अयं स सोम इन्द्र ते सुतः पिब ॥

6.043.04a yasya mandāno andhaso māghonaṁ dadhiṣe śavaḥ |
6.043.04c ayaṁ sa soma indra te sutaḥ piba ||

6.044.01a यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः ।

6.044.01c सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥

6.044.01a yo rayivo rayintamo yo dyumnair dyumnavattamaḥ |
6.044.01c somaḥ sutaḥ sa indra te 'sti svadhāpate madaḥ ||

6.044.02a यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् ।

6.044.02c सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥

6.044.02a yaḥ śagmas tuviśagma te rāyo dāmā matīnām |
6.044.02c somaḥ sutaḥ sa indra te 'sti svadhāpate madaḥ ||

6.044.03a येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ।

6.044.03c सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥

6.044.03a yena vṛddho na śavasā turo na svābhir ūtibhiḥ |
6.044.03c somaḥ sutaḥ sa indra te 'sti svadhāpate madaḥ ||

6.044.04a त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।

6.044.04c इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ॥

6.044.04a tyam u vo aprahaṇaṁ gṛṇīṣe śavasas patim |
6.044.04c indraṁ viśvāsāhaṁ naram maṁhiṣṭhaṁ viśvacarṣaṇim ||

6.044.05a यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः ।

6.044.05c तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः ॥

6.044.05a yaṁ vardhayantīd giraḥ patiṁ turasya rādhasaḥ |
6.044.05c tam in nv asya rodasī devī śuṣmaṁ saparyataḥ ||

6.044.06a तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि ।

6.044.06c विपो न यस्योतयो वि यद्रोहन्ति सक्षितः ॥

6.044.06a tad va ukthasya barhaṇendrāyopastṛṇīṣaṇi |
6.044.06c vipo na yasyotayo vi yad rohanti sakṣitaḥ ||

6.044.07a अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत् ।

6.044.07c ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥

6.044.07a avidad dakṣam mitro navīyān papāno devebhyo vasyo acait |
6.044.07c sasavān staulābhir dhautarībhir uruṣyā pāyur abhavat sakhibhyaḥ ||

6.044.08a ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।

6.044.08c दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥

6.044.08a ṛtasya pathi vedhā apāyi śriye manāṁsi devāso akran |
6.044.08c dadhāno nāma maho vacobhir vapur dṛśaye venyo vy āvaḥ ||

6.044.09a द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ।

6.044.09c वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि ॥

6.044.09a dyumattamaṁ dakṣaṁ dhehy asme sedhā janānām pūrvīr arātīḥ |
6.044.09c varṣīyo vayaḥ kṛṇuhi śacībhir dhanasya sātāv asmām̐ aviḍḍhi ||

6.044.10a इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ।

6.044.10c नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः ॥

6.044.10a indra tubhyam in maghavann abhūma vayaṁ dātre harivo mā vi venaḥ |
6.044.10c nakir āpir dadṛśe martyatrā kim aṅga radhracodanaṁ tvāhuḥ ||

6.044.11a मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।

6.044.11c पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः ॥

6.044.11a mā jasvane vṛṣabha no rarīthā mā te revataḥ sakhye riṣāma |
6.044.11c pūrvīṣ ṭa indra niṣṣidho janeṣu jahy asuṣvīn pra vṛhāpṛṇataḥ ||

6.044.12a उदभ्राणीव स्तनयन्नियर्तीन्द्रो राधांस्यश्व्यानि गव्या ।

6.044.12c त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥

6.044.12a ud abhrāṇīva stanayann iyartīndro rādhāṁsy aśvyāni gavyā |
6.044.12c tvam asi pradivaḥ kārudhāyā mā tvādāmāna ā dabhan maghonaḥ ||

6.044.13a अध्वर्यो वीर प्र महे सुतानामिन्द्राय भर स ह्यस्य राजा ।

6.044.13c यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणाम् ॥

6.044.13a adhvaryo vīra pra mahe sutānām indrāya bhara sa hy asya rājā |
6.044.13c yaḥ pūrvyābhir uta nūtanābhir gīrbhir vāvṛdhe gṛṇatām ṛṣīṇām ||

6.044.14a अस्य मदे पुरु वर्पांसि विद्वानिन्द्रो वृत्राण्यप्रती जघान ।

6.044.14c तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥

6.044.14a asya made puru varpāṁsi vidvān indro vṛtrāṇy apratī jaghāna |

6.044.14c tam u pra hoṣi madhumantam asmai somaṁ vīrāya śipriṇe pibadhyai ||

6.044.15a पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।

6.044.15c गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥

6.044.15a pātā sutam indro astu somaṁ hantā vṛtraṁ vajreṇa mandasānaḥ |
6.044.15c gantā yajñam parāvataś cid acchā vasur dhīnām avitā kārudhāyāḥ ||

6.044.16a इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि ।

6.044.16c मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्व्यंहः ॥

6.044.16a idaṁ tyat pātram indrapānam indrasya priyam amṛtam apāyi |
6.044.16c matsad yathā saumanasāya devaṁ vy a1smad dveṣo yuyavad vy aṁhaḥ ||

6.044.17a एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान् ।

6.044.17c अभिषेणाँ अभ्या३देदिशानान्पराच इन्द्र प्र मृणा जही च ॥

6.044.17a enā mandāno jahi śūra śatrūñ jāmim ajāmim maghavann amitrān |
6.044.17c abhiṣeṇāṁ abhy ā3dediśānān parāca indra pra mṛṇā jahī ca ||

6.044.18a आसु ष्मा णो मघवन्निन्द्र पृत्स्व१स्मभ्यं महि वरिवः सुगं कः ।

6.044.18c अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ॥

6.044.18a āsu ṣmā ṇo maghavann indra pṛtsv a1smabhyam mahi varivaḥ sugaṁ kaḥ |
6.044.18c apāṁ tokasya tanayasya jeṣa indra sūrīn kṛṇuhi smā no ardham ||

6.044.19a आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।

6.044.19c अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु ॥

6.044.19a ā tvā harayo vṛṣaṇo yujānā vṛṣarathāso vṛṣaraśmayo 'tyāḥ |
6.044.19c asmatrāñco vṛṣaṇo vajravāho vṛṣṇe madāya suyujo vahantu ||

6.044.20a आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः ।

6.044.20c इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् ॥

6.044.20a ā te vṛṣan vṛṣaṇo droṇam asthur ghṛtapruṣo normayo madantaḥ |
6.044.20c indra pra tubhyaṁ vṛṣabhiḥ sutānāṁ vṛṣṇe bharanti vṛṣabhāya somam ||

6.044.21a वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभ स्तियानाम् ।

6.044.21c वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥

6.044.21a vṛṣāsi divo vṛṣabhaḥ pṛthivyā vṛṣā sindhūnāṁ vṛṣabha stiyānām |
6.044.21c vṛṣṇe ta indur vṛṣabha pīpāya svādū raso madhupeyo varāya ||

6.044.22a अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत् ।

6.044.22c अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः ॥

6.044.22a ayaṁ devaḥ sahasā jāyamāna indreṇa yujā paṇim astabhāyat |
6.044.22c ayaṁ svasya pitur āyudhānīndur amuṣṇād aśivasya māyāḥ ||

6.044.23a अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः ।

6.044.23c अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम् ॥

6.044.23a ayam akṛṇod uṣasaḥ supatnīr ayaṁ sūrye adadhāj jyotir antaḥ |
6.044.23c ayaṁ tridhātu divi rocaneṣu triteṣu vindad amṛtaṁ nigūḻham ||

6.044.24a अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिम् ।

6.044.24c अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम् ॥

6.044.24a ayaṁ dyāvāpṛthivī vi ṣkabhāyad ayaṁ ratham ayunak saptaraśmim |
6.044.24c ayaṁ goṣu śacyā pakvam antaḥ somo dādhāra daśayantram utsam ||

6.045.01a य आनयत्परावतः सुनीती तुर्वशं यदुम् ।

6.045.01c इन्द्रः स नो युवा सखा ॥

6.045.01a ya ānayat parāvataḥ sunītī turvaśaṁ yadum |
6.045.01c indraḥ sa no yuvā sakhā ||

6.045.02a अविप्रे चिद्वयो दधदनाशुना चिदर्वता ।

6.045.02c इन्द्रो जेता हितं धनम् ॥

6.045.02a avipre cid vayo dadhad anāśunā cid arvatā |
6.045.02c indro jetā hitaṁ dhanam ||

6.045.03a महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः ।

6.045.03c नास्य क्षीयन्त ऊतयः ॥

6.045.03a mahīr asya praṇītayaḥ pūrvīr uta praśastayaḥ |
6.045.03c nāsya kṣīyanta ūtayaḥ ||

6.045.04a सखायो ब्रह्मवाहसेऽर्चत प्र च गायत ।
6.045.04c स हि नः प्रमतिर्मही ॥

6.045.04a sakhāyo brahmavāhase 'rcata pra ca gāyata |
6.045.04c sa hi naḥ pramatir mahī ||

6.045.05a त्वमेकस्य वृत्रहन्नविता द्वयोरसि ।
6.045.05c उतेदृशे यथा वयम् ॥

6.045.05a tvam ekasya vṛtrahann avitā dvayor asi |
6.045.05c utedṛśe yathā vayam ||

6.045.06a नयसीद्वति द्विषः कृणोष्युक्थशंसिनः ।
6.045.06c नृभिः सुवीर उच्यसे ॥

6.045.06a nayasīd v ati dviṣaḥ kṛṇoṣy ukthaśaṁsinaḥ |
6.045.06c nṛbhiḥ suvīra ucyase ||

6.045.07a ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम् ।
6.045.07c गां न दोहसे हुवे ॥

6.045.07a brahmāṇam brahmavāhasaṁ gīrbhiḥ sakhāyam ṛgmiyam |
6.045.07c gāṁ na dohase huve ||

6.045.08a यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता ।
6.045.08c वीरस्य पृतनाषहः ॥

6.045.08a yasya viśvāni hastayor ūcur vasūni ni dvitā |
6.045.08c vīrasya pṛtanāṣahaḥ ||

6.045.09a वि दृळ्हानि चिदद्रिवो जनानां शचीपते ।
6.045.09c वृह माया अनानत ॥

6.045.09a vi dṛḷhāni cid adrivo janānāṁ śacīpate |
6.045.09c vṛha māyā anānata ||

6.045.10a तमु त्वा सत्य सोमपा इन्द्र वाजानां पते ।

6.045.10c अहूमहि श्रवस्यवः ॥

6.045.10a tam u tvā satya somapā indra vājānām pate |
6.045.10c ahūmahi śravasyavaḥ ||

6.045.11a तमु त्वा यः पुरासिथ यो वा नूनं हिते धने ।

6.045.11c हव्यः स श्रुधी हवम् ॥

6.045.11a tam u tvā yaḥ purāsitha yo vā nūnaṁ hite dhane |
6.045.11c havyaḥ sa śrudhī havam ||

6.045.12a धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान् ।

6.045.12c त्वया जेष्म हितं धनम् ॥

6.045.12a dhībhir arvadbhir arvato vājām̐ indra śravāyyān |
6.045.12c tvayā jeṣma hitaṁ dhanam ||

6.045.13a अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते ।

6.045.13c भरे वितन्तसाय्यः ॥

6.045.13a abhūr u vīra girvaṇo mahām̐ indra dhane hite |
6.045.13c bhare vitantasāyyaḥ ||

6.045.14a या त ऊतिरमित्रहन्मक्षूजवस्तमासति ।

6.045.14c तया नो हिनुही रथम् ॥

6.045.14a yā ta ūtir amitrahan makṣūjavastamāsati |
6.045.14c tayā no hinuhī ratham ||

6.045.15a स रथेन रथीतमोऽस्माकेनाभियुग्वना ।

6.045.15c जेषि जिष्णो हितं धनम् ॥

6.045.15a sa rathena rathītamo 'smākenābhiyugvanā |
6.045.15c jeṣi jiṣṇo hitaṁ dhanam ||

6.045.16a य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः ।

6.045.16c पतिर्जज्ञे वृषक्रतुः ॥

6.045.16a ya eka it tam u ṣṭuhi kṛṣṭīnāṁ vicarṣaṇiḥ |
6.045.16c patir jajñe vṛṣakratuḥ ||

6.045.17a यो गृणतामिदासिथापिरूती शिवः सखा ।

6.045.17c स त्वं न इन्द्र मृळय ॥

6.045.17a yo gṛṇatām id āsithāpir ūtī śivaḥ sakhā |
6.045.17c sa tvaṁ na indra mṛḷaya ||

6.045.18a धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः ।

6.045.18c सासहीष्ठा अभि स्पृधः ॥

6.045.18a dhiṣva vajraṁ gabhastyo rakṣohatyāya vajrivaḥ |
6.045.18c sāsahīṣṭhā abhi spṛdhaḥ ||

6.045.19a प्रत्नं रयीणां युजं सखायं कीरिचोदनम् ।

6.045.19c ब्रह्मवाहस्तमं हुवे ॥

6.045.19a pratnaṁ rayīṇāṁ yujaṁ sakhāyaṁ kīricodanam |
6.045.19c brahmavāhastamaṁ huve ||

6.045.20a स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते ।

6.045.20c गिर्वणस्तमो अध्रिगुः ॥

6.045.20a sa hi viśvāni pārthivām̐ eko vasūni patyate |
6.045.20c girvaṇastamo adhriguḥ ||

6.045.21a स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः ।

6.045.21c गोमद्भिर्गोपते धृषत् ॥

6.045.21a sa no niyudbhir ā pṛṇa kāmaṁ vājebhir aśvibhiḥ |
6.045.21c gomadbhir gopate dhṛṣat ||

6.045.22a तद्वो गाय सुते सचा पुरुहूताय सत्वने ।

6.045.22c शं यद्गवे न शाकिने ॥

6.045.22a tad vo gāya sute sacā puruhūtāya satvane |

6.045.22c śaṁ yad gave na śākine ||

6.045.23a न घा वसुर्नि यमते दानं वाजस्य गोमतः ।

6.045.23c यत्सीमुप श्रवद्गिरः ॥

6.045.23a na ghā vasur ni yamate dānaṁ vājasya gomataḥ |
6.045.23c yat sīm upa śravad giraḥ ||

6.045.24a कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।

6.045.24c शचीभिरप नो वरत् ॥

6.045.24a kuvitsasya pra hi vrajaṁ gomantaṁ dasyuhā gamat |
6.045.24c śacībhir apa no varat ||

6.045.25a इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः ।

6.045.25c इन्द्र वत्सं न मातरः ॥

6.045.25a imā u tvā śatakrato 'bhi pra ṇonuvur giraḥ |
6.045.25c indra vatsaṁ na mātaraḥ ||

6.045.26a दूणाशं सख्यं तव गौरसि वीर गव्यते ।

6.045.26c अश्वो अश्वायते भव ॥

6.045.26a dūṇāśaṁ sakhyaṁ tava gaur asi vīra gavyate |
6.045.26c aśvo aśvāyate bhava ||

6.045.27a स मन्दस्वा ह्यन्धसो राधसे तन्वा महे ।

6.045.27c न स्तोतारं निदे करः ॥

6.045.27a sa mandasvā hy andhaso rādhase tanvā mahe |
6.045.27c na stotāraṁ nide karaḥ ||

6.045.28a इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।

6.045.28c वत्सं गावो न धेनवः ॥

6.045.28a imā u tvā sute-sute nakṣante girvaṇo giraḥ |
6.045.28c vatsaṁ gāvo na dhenavaḥ ||

6.045.29a पुरूतमं पुरूणां स्तोतॄणां विवाचि ।

6.045.29c वाजेभिर्वाजयताम् ॥

6.045.29a purūtamam purūṇāṁ stotṝṇāṁ vivāci |
6.045.29c vājebhir vājayatām ||

6.045.30a अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः ।

6.045.30c अस्मान्राये महे हिनु ॥

6.045.30a asmākam indra bhūtu te stomo vāhiṣṭho antamaḥ |
6.045.30c asmān rāye mahe hinu ||

6.045.31a अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् ।

6.045.31c उरुः कक्षो न गाङ्ग्यः ॥

6.045.31a adhi bṛbuḥ paṇīnāṁ varṣiṣṭhe mūrdhann asthāt |
6.045.31c uruḥ kakṣo na gāṅgyaḥ ||

6.045.32a यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी ।

6.045.32c सद्यो दानाय मंहते ॥

6.045.32a yasya vāyor iva dravad bhadrā rātiḥ sahasriṇī |
6.045.32c sadyo dānāya maṁhate ||

6.045.33a तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।

6.045.33c बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ॥

6.045.33a tat su no viśve arya ā sadā gṛṇanti kāravaḥ |
6.045.33c bṛbuṁ sahasradātamaṁ sūriṁ sahasrasātamam ||

6.046.01a त्वामिद्धि हवामहे साता वाजस्य कारवः ।

6.046.01c त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

6.046.01a tvām id dhi havāmahe sātā vājasya kāravaḥ |
6.046.01c tvāṁ vṛtreṣv indra satpatiṁ naras tvāṁ kāṣṭhāsv arvataḥ ||

6.046.02a स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।

6.046.02c गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥

6.046.02a sa tvaṁ naś citra vajrahasta dhṛṣṇuyā maha stavāno adrivaḥ |
6.046.02c gām aśvaṁ rathyam indra saṁ kira satrā vājaṁ na jigyuṣe ||

6.046.03a यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।

6.046.03c सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥

6.046.03a yaḥ satrāhā vicarṣaṇir indraṁ taṁ hūmahe vayam |
6.046.03c sahasramuṣka tuvinṛmṇa satpate bhavā samatsu no vṛdhe ||

6.046.04a बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम ।

6.046.04c अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये ॥

6.046.04a bādhase janān vṛṣabheva manyunā ghṛṣau mīḻha ṛcīṣama |
6.046.04c asmākam bodhy avitā mahādhane tanūṣv apsu sūrye ||

6.046.05a इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।

6.046.05c येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥

6.046.05a indra jyeṣṭhaṁ na ā bharaṁ̐ ojiṣṭham papuri śravaḥ |
6.046.05c yeneme citra vajrahasta rodasī obhe suśipra prāḥ ||

6.046.06a त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे ।

6.046.06c विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्सुषहान्कृधि ॥

6.046.06a tvām ugram avase carṣaṇīsahaṁ rājan deveṣu hūmahe |
6.046.06c viśvā su no vithurā pibdanā vaso 'mitrān suṣahān kṛdhi ||

6.046.07a यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।

6.046.07c यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥

6.046.07a yad indra nāhuṣīṣv āṁ̐ ojo nṛmṇaṁ ca kṛṣṭiṣu |
6.046.07c yad vā pañca kṣitīnāṁ dyumnam ā bhara satrā viśvāni pauṁsyā ||

6.046.08a यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यम् ।

6.046.08c अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे ॥

6.046.08a yad vā tṛkṣau maghavan druhyāv ā jane yat pūrau kac ca vṛṣṇyam |
6.046.08c asmabhyaṁ tad rirīhi saṁ nṛṣāhye 'mitrān pṛtsu turvaṇe ||

6.046.09a इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।

6.046.09c छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥

6.046.09a indra tridhātu śaraṇaṁ trivarūthaṁ svastimat |
6.046.09c chardir yaccha maghavadbhyaś ca mahyaṁ ca yāvayā didyum ebhyaḥ ||

6.046.10a ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।

6.046.10c अध स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥

6.046.10a ye gavyatā manasā śatrum ādabhur abhipraghnanti dhṛṣṇuyā |
6.046.10c adha smā no maghavann indra girvaṇas tanūpā antamo bhava ||

6.046.11a अध स्मा नो वृधे भवेन्द्र नायमवा युधि ।

6.046.11c यदन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः ॥

6.046.11a adha smā no vṛdhe bhavendra nāyam avā yudhi |
6.046.11c yad antarikṣe patayanti parṇino didyavas tigmamūrdhānaḥ ||

6.046.12a यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितॄणाम् ।

6.046.12c अध स्मा यच्छ तन्वे३ तने च छर्दिरचित्तं यावय द्वेषः ॥

6.046.12a yatra śūrāsas tanvo vitanvate priyā śarma pitṝṇām |
6.046.12c adha smā yaccha tanve3 tane ca chardir acittaṁ yāvaya dveṣaḥ ||

6.046.13a यदिन्द्र सर्गे अर्वतश्चोदयासे महाधने ।

6.046.13c असमने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः ॥

6.046.13a yad indra sarge arvataś codayāse mahādhane |
6.046.13c asamane adhvani vṛjine pathi śyenām̐ iva śravasyataḥ ||

6.046.14a सिन्धूँरिव प्रवण आशुया यतो यदि क्लोशमनु ष्वणि ।

6.046.14c आ ये वयो न वर्वृतत्यामिषि गृभीता बाह्वोर्गवि ॥

6.046.14a sindhūm̐r iva pravaṇa āśuyā yato yadi klośam anu ṣvaṇi |
6.046.14c ā ye vayo na varvṛtaty āmiṣi gṛbhītā bāhvor gavi ||

6.047.01a स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।

6.047.01c उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ॥

6.047.01a svāduṣ kilāyam madhumām̐ utāyaṁ tīvraḥ kilāyaṁ rasavām̐ utāyam |
6.047.01c uto nv a1sya papivāṁsam indraṁ na kaś cana sahata āhaveṣu ||

6.047.02a अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद ।

6.047.02c पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देह्यो३ हन् ॥

6.047.02a ayaṁ svādur iha madiṣṭha āsa yasyendro vṛtrahatye mamāda |
6.047.02c purūṇi yaś cyautnā śambarasya vi navatiṁ nava ca dehyo3 han ||

6.047.03a अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः ।

6.047.03c अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥

6.047.03a ayam me pīta ud iyarti vācam ayam manīṣām uśatīm ajīgaḥ |
6.047.03c ayaṁ ṣaḷ urvīr amimīta dhīro na yābhyo bhuvanaṁ kac canāre ||

6.047.04a अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।

6.047.04c अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम् ॥

6.047.04a ayaṁ sa yo varimāṇam pṛthivyā varṣmāṇaṁ divo akṛṇod ayaṁ saḥ |
6.047.04c ayam pīyūṣaṁ tisṛṣu pravatsu somo dādhārorv a1ntarikṣam ||

6.047.05a अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके ।

6.047.05c अयं महान्महता स्कम्भनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान् ॥

6.047.05a ayaṁ vidac citradṛśīkam arṇaḥ śukrasadmanām uṣasām anīke |
6.047.05c ayam mahān mahatā skambhanenod dyām astabhnād vṛṣabho marutvān ||

6.047.06a धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।

6.047.06c माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ॥

6.047.06a dhṛṣat piba kalaśe somam indra vṛtrahā śūra samare vasūnām |
6.047.06c mādhyandine savana ā vṛṣasva rayisthāno rayim asmāsu dhehi ||

6.047.07a इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।

6.047.07c भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ॥

6.047.07a indra pra ṇaḥ puraeteva paśya pra no naya prataraṁ vasyo accha |

6.047.07c bhavā supāro atipārayo no bhavā sunītir uta vāmanītiḥ ||

6.047.08a उरुं नो लोकमनु नेषि विद्वान्स्वर्वज्ज्योतिरभयं स्वस्ति ।

6.047.08c ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता ॥

6.047.08a urum no lokam anu neṣi vidvān svarvaj jyotir abhayaṁ svasti |
6.047.08c ṛṣvā ta indra sthavirasya bāhū upa stheyāma śaraṇā bṛhantā ||

6.047.09a वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा ।

6.047.09c इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः ॥

6.047.09a variṣṭhe na indra vandhure dhā vahiṣṭhayoḥ śatāvann aśvayor ā |
6.047.09c iṣam ā vakṣīṣāṁ varṣiṣṭhām mā nas tārīn maghavan rāyo aryaḥ ||

6.047.10a इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम् ।

6.047.10c यत्किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम् ॥

6.047.10a indra mṛḷa mahyaṁ jīvātum iccha codaya dhiyam ayaso na dhārām |
6.047.10c yat kiṁ cāhaṁ tvāyur idaṁ vadāmi taj juṣasva kṛdhi mā devavantam ||

6.047.11a त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।

6.047.11c ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥

6.047.11a trātāram indram avitāram indraṁ have-have suhavaṁ śūram indram |
6.047.11c hvayāmi śakram puruhūtam indraṁ svasti no maghavā dhātv indraḥ ||

6.047.12a इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।

6.047.12c बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥

6.047.12a indraḥ sutrāmā svavām̐ avobhiḥ sumṛḷīko bhavatu viśvavedāḥ |
6.047.12c bādhatām dveṣo abhayaṁ kṛṇotu suvīryasya patayaḥ syāma ||

6.047.13a तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।

6.047.13c स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥

6.047.13a tasya vayaṁ sumatau yajñiyasyāpi bhadre saumanase syāma |
6.047.13c sa sutrāmā svavām̐ indro asme ārāc cid dveṣaḥ sanutar yuyotu ||

6.047.14a अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते ।

6.047.14c उरू न राधः सवना पुरूण्यपो गा वज्रिन्युवसे समिन्दून् ॥

6.047.14a ava̱ tve i̍ndra pra̱va̍to̱ normir giro̱ brahmā̍ṇi ni̱yuto̍ dhavante |
6.047.14c u̱rū na rādha̱ḥ sava̍nā pu̱rūṇy a̱po gā va̍jrin yuvase̱ sam indū̍n ||

6.047.15a क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत् ।

6.047.15c पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥

6.047.15a ka ī̍ṁ stava̱t kaḥ pṛ̍ṇā̱t ko ya̍jāte̱ yad u̱gram in ma̱ghavā̍ vi̱śvahāve̍t |
6.047.15c pādā̍v iva pra̱hara̍nn a̱nyam-a̍nyaṁ kṛ̱ṇoti̱ pūrva̱m apa̍ra̱ṁ śacī̍bhiḥ ||

6.047.16a शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।

6.047.16c एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥

6.047.16a śṛ̱ṇve vī̱ra u̱gram-u̍graṁ damā̱yann a̱nyam-a̍nyam atinenī̱yamā̍naḥ |
6.047.16c e̱dha̱mā̱na̱dvi̱l u̱bhaya̍sya̱ rājā̍ coṣkūyate̱ viśa̱ indro̍ manu̱ṣyā̍n ||

6.047.17a परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।

6.047.17c अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति ॥

6.047.17a parā̱ pūrve̍ṣāṁ sa̱khyā vṛ̍ṇakti vi̱tartu̍rāṇo̱ apa̍rebhir eti |
6.047.17c anā̍nubhūtīr avadhūnvā̱naḥ pū̱rvīr indra̍ḥ śa̱rada̍s tartarīti ||

6.047.18a रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

6.047.18c इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥

6.047.18a rū̱paṁ-rū̱pa̱m prati̍rūpo babhūva̱ tad a̍sya rū̱pam pra̱ti̱cakṣa̱ṇāya |
6.047.18c indro̍ mā̱yābhi̍ḥ puru̱rūpa̍ īyate yu̱ktā hy a̍sya̱ hara̍yaḥ śa̱tā daśa̍ ||

6.047.19a युजानो हरिता रथे भूरि त्वष्टेह राजति ।

6.047.19c को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥

6.047.19a yu̱jā̱no ha̱ritā̱ rathe̱ bhūri̱ tvaṣṭe̱ha rā̍jati |
6.047.19c ko vi̱śvāhā̍ dvi̱ṣata̱ḥ pakṣa̍ āsata u̱tāsī̍neṣu sū̱riṣu̍ ||

6.047.20a अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।

6.047.20c बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् ॥

6.047.20a a̱ga̱vyū̱ti kṣetra̱m āga̍nma devā u̱rvī sa̱tī bhūmi̱r aṁhūra̱ṇābhū̍t |

6.047.20c bṛhaspate pra cikitsā gaviṣṭāv itthā sate jaritra indra panthām ||

6.047.21a दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः ।

6.047.21c अहन्दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च ॥

6.047.21a dive-dive sadṛśīr anyam ardhaṁ kṛṣṇā asedhad apa sadmano jāḥ |
6.047.21c ahan dāsā vṛṣabho vasnayantodavraje varcinaṁ śambaraṁ ca ||

6.047.22a प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात् ।

6.047.22c दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म ॥

6.047.22a prastoka in nu rādhasas ta indra daśa kośayīr daśa vājino 'dāt |
6.047.22c divodāsād atithigvasya rādhaḥ śāmbaraṁ vasu praty agrabhīṣma ||

6.047.23a दशाश्वान्दश कोशान्दश वस्त्राधिभोजना ।

6.047.23c दशो हिरण्यपिण्डान्दिवोदासादसानिषम् ॥

6.047.23a daśāśvān daśa kośān daśa vastrādhibhojanā |
6.047.23c daśo hiraṇyapiṇḍān divodāsād asāniṣam ||

6.047.24a दश रथान्प्रष्टिमतः शतं गा अथर्वभ्यः ।

6.047.24c अश्वथः पायवेऽदात् ॥

6.047.24a daśa rathān praṣṭimataḥ śataṁ gā atharvabhyaḥ |
6.047.24c aśvathaḥ pāyave 'dāt ||

6.047.25a महि राधो विश्वजन्यं दधानान्भरद्वाजान्सार्ञ्जयो अभ्ययष्ट ॥

6.047.25a mahi rādho viśvajanyaṁ dadhānān bharadvājān sārñjayo abhy ayaṣṭa ||

6.047.26a वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।

6.047.26c गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥

6.047.26a vanaspate vīḍvaṅgo hi bhūyā asmatsakhā prataraṇaḥ suvīraḥ |
6.047.26c gobhiḥ sannaddho asi vīlayasvāsthātā te jayatu jetvāni ||

6.047.27a दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।

6.047.27c अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥

6.047.27a divas pṛthivyāḥ pary oja udbhṛtam vanaspatibhyaḥ pary ābhṛtaṁ sahaḥ |
6.047.27c apām ojmānam pari gobhir āvṛtam indrasya vajraṁ haviṣā rathaṁ yaja ||

6.047.28a इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।

6.047.28c सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥

6.047.28a indrasya vajro marutām anīkam mitrasya garbho varuṇasya nābhiḥ |
6.047.28c semāṁ no havyadātiṁ juṣāṇo deva ratha prati havyā gṛbhāya ||

6.047.29a उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।

6.047.29c स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥

6.047.29a upa śvāsaya pṛthivīm uta dyām purutrā te manutāṁ viṣṭhitaṁ jagat |
6.047.29c sa dundubhe sajūr indreṇa devair dūrād davīyo apa sedha śatrūn ||

6.047.30a आ क्रन्दय बलमोजो न आ धा नि ष्टनिहि दुरिता बाधमानः ।

6.047.30c अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व ॥

6.047.30a ā krandaya balam ojo na ā dhā ni ṣṭanihi duritā bādhamānaḥ |
6.047.30c apa protha dundubhe ducchunā ita indrasya muṣṭir asi vīḷayasva ||

6.047.31a आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।

6.047.31c समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥

6.047.31a āmūr aja pratyāvartayemāḥ ketumad dundubhir vāvadīti |
6.047.31c sam aśvaparṇāś caranti no naro 'smākam indra rathino jayantu ||

6.048.01a यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।

6.048.01c प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥

6.048.01a yajñā-yajñā vo agnaye girā-girā ca dakṣase |
6.048.01c pra-pra vayam amṛtaṁ jātavedasam priyam mitraṁ na śaṁsiṣam ||

6.048.02a ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये ।

6.048.02c भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥

6.048.02a ūrjo napātaṁ sa hināyam asmayur dāśema havyadātaye |
6.048.02c bhuvad vājeṣv avitā bhuvad vṛdha uta trātā tanūnām ||

6.048.03a वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा ।

6.048.03c अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि ॥

6.048.03a vṛṣā hy agne ajaro mahān vibhāsy arciṣā |
6.048.03c ajasreṇa śociṣā śośucac chuce sudītibhiḥ su dīdihi ||

6.048.04a महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना ।

6.048.04c अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ॥

6.048.04a maho devān yajasi yakṣy ānuṣak tava kratvota daṁsanā |
6.048.04c arvācaḥ sīṁ kṛṇuhy agne 'vase rāsva vājota vaṁsva ||

6.048.05a यमापो अद्रयो वना गर्भमृतस्य पिप्रति ।

6.048.05c सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥

6.048.05a yam āpo adrayo vanā garbham ṛtasya piprati |
6.048.05c sahasā yo mathito jāyate nṛbhiḥ pṛthivyā adhi sānavi ||

6.048.06a आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।

6.048.06c तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ॥

6.048.06a ā yaḥ paprau bhānunā rodasī ubhe dhūmena dhāvate divi |
6.048.06c tiras tamo dadṛśa ūrmyāsv ā śyāvāsv aruṣo vṛṣā śyāvā aruṣo vṛṣā ||

6.048.07a बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।

6.048.07c भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥

6.048.07a bṛhadbhir agne arcibhiḥ śukreṇa deva śociṣā |
6.048.07c bharadvāje samidhāno yaviṣṭhya revan naḥ śukra dīdihi dyumat pāvaka dīdihi ||

6.048.08a विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।

6.048.08c शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमा स्तोतृभ्यो ये च ददति ॥

6.048.08a viśvāsāṁ gṛhapatir viśām asi tvam agne mānuṣīṇām |
6.048.08c śatam pūrbhir yaviṣṭha pāhy aṁhasaḥ sameddhāraṁ śataṁ himā stotṛbhyo ye ca dadati ||

6.048.09a त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।

6.048.09c अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥

6.048.09a tvaṁ naś citra ūtyā vaso rādhāṁsi codaya |
6.048.09c asya rāyas tvam agne rathīr asi vidā gādhaṁ tuce tu naḥ ||

6.048.10a पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।

6.048.10c अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च ॥

6.048.10a parṣi tokaṁ tanayam partṛbhiṣ ṭvam adabdhair aprayutvabhiḥ |
6.048.10c agne heḷāṁsi daivyā yuyodhi no 'devāni hvarāṁsi ca ||

6.048.11a आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः ।

6.048.11c सृजध्वमनपस्फुराम् ॥

6.048.11a ā sakhāyaḥ sabardughāṁ dhenum ajadhvam upa navyasā vacaḥ |
6.048.11c sṛjadhvam anapasphurām ||

6.048.12a या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।

6.048.12c या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी ॥

6.048.12a yā śardhāya mārutāya svabhānave śravo 'mṛtyu dhukṣata |
6.048.12c yā mṛḷīke marutāṁ turāṇāṁ yā sumnair evayāvarī ||

6.048.13a भरद्वाजायाव धुक्षत द्विता ।

6.048.13b धेनुं च विश्वदोहसमिषं च विश्वभोजसम् ॥

6.048.13a bharadvājāyāva dhukṣata dvitā |
6.048.13b dhenuṁ ca viśvadohasam iṣaṁ ca viśvabhojasam ||

6.048.14a तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम् ।

6.048.14c अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे ॥

6.048.14a taṁ va indraṁ na sukratuṁ varuṇam iva māyinam |
6.048.14c aryamaṇaṁ na mandraṁ sṛprabhojasaṁ viṣṇuṁ na stuṣa ādiśe ||

6.048.15a त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।

6.048.15c सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसू करत्सुवेदा नो वसू करत् ॥

6.048.15a tveṣaṁ śardho na mārutaṁ tuviṣvaṇy anarvāṇam pūṣaṇaṁ saṁ yathā śatā |

6.048.15c saṁ sahasrā kāriṣac carṣaṇibhya ā̃ṁ āvir gūḻhā vasū karat suvedā no vasū karat ||

6.048.16a आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे ।

6.048.16c अघा अर्यो अरातयः ॥

6.048.16a ā mā pūṣann upa drava śaṁsiṣaṁ nu te apikarṇa āghṛṇe |

6.048.16c aghā aryo arātayaḥ ||

6.048.17a मा काकम्बीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः ।

6.048.17c मोत सूरो अह एवा चन ग्रीवा आदधते वेः ॥

6.048.17a mā kākambīram ud vṛho vanaspatim aśastīr vi hi nīnaśaḥ |

6.048.17c mota sūro aha evā cana grīvā ādadhate veḥ ||

6.048.18a दृतेरिव तेऽवृकमस्तु सख्यम् ।

6.048.18b अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥

6.048.18a dṛter iva te 'vṛkam astu sakhyam |

6.048.18b acchidrasya dadhanvataḥ supūrṇasya dadhanvataḥ ||

6.048.19a परो हि मर्त्यैरसि समो देवैरुत श्रिया ।

6.048.19c अभि ख्यः पूषन्पृतनासु नस्त्वमवा नूनं यथा पुरा ॥

6.048.19a paro hi martyair asi samo devair uta śriyā |

6.048.19c abhi khyaḥ pūṣan pṛtanāsu nas tvam avā nūnaṁ yathā purā ||

6.048.20a वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।

6.048.20c देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ॥

6.048.20a vāmī vāmasya dhūtayaḥ praṇītir astu sūnṛtā |

6.048.20c devasya vā maruto martyasya vejānasya prayajyavaḥ ||

6.048.21a सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।

6.048.21c त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥

6.048.21a sadyaś cid yasya carkṛtiḥ pari dyāṁ devo naiti sūryaḥ |

6.048.21c tveṣaṁ śavo dadhire nāma yajñiyam maruto vṛtrahaṁ śavo jyeṣṭhaṁ vṛtrahaṁ śavaḥ ||

6.048.22a सकृद्ध द्यौरजायत सकृद्भूमिरजायत ।

6.048.22c पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ॥

6.048.22a sakṛd dha dyaur ajāyata sakṛd bhūmir ajāyata |
6.048.22c pṛśnyā dugdhaṁ sakṛt payas tad anyo nānu jāyate ||

6.049.01a स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता ।

6.049.01c त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः ॥

6.049.01a stuṣe janaṁ suvrataṁ navyasībhir gīrbhir mitrāvaruṇā sumnayantā |
6.049.01c ta ā gamantu ta iha śruvantu sukṣatrāso varuṇo mitro agniḥ ||

6.049.02a विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः ।

6.049.02c दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ॥

6.049.02a viśo-viśa īḍyam adhvareṣv adṛptakratum aratiṁ yuvatyoḥ |
6.049.02c divaḥ śiśuṁ sahasaḥ sūnum agniṁ yajñasya ketum aruṣaṁ yajadhyai ||

6.049.03a अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या ।

6.049.03c मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥

6.049.03a aruṣasya duhitarā virūpe stṛbhir anyā pipiśe sūro anyā |
6.049.03c mithasturā vicarantī pāvake manma śrutaṁ nakṣata ṛcyamāne ||

6.049.04a प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।

6.049.04c द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥

6.049.04a pra vāyum acchā bṛhatī manīṣā bṛhadrayiṁ viśvavāraṁ rathaprām |
6.049.04c dyutadyāmā niyutaḥ patyamānaḥ kaviḥ kavim iyakṣasi prayajyo ||

6.049.05a स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।

6.049.05c येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥

6.049.05a sa me vapuś chadayad aśvinor yo ratho virukmān manasā yujānaḥ |
6.049.05c yena narā nāsatyeṣayadhyai vartir yāthas tanayāya tmane ca ||

6.049.06a पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।

6.049.06c सत्यश्रुतः कवयो यस्य गीर्भिर्जगत स्थातर्जगदा कृणुध्वम् ॥

6.049.06a parjanyavātā vṛṣabhā pṛthivyāḥ purīṣāṇi jinvatam apyāni |
6.049.06c satyaśrutaḥ kavayo yasya gīrbhir jagata sthātar jagad ā kṛṇudhvam ||

6.049.07a पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात्।

6.049.07c ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत्॥

6.049.07a pāvīravī kanyā citrāyuḥ sarasvatī vīrapatnī dhiyaṁ dhāt |
6.049.07c gnābhir acchidraṁ śaraṇaṁ sajoṣā durādharṣaṁ gṛṇate śarma yaṁsat ||

6.049.08a पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम्।

6.049.08c स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा॥

6.049.08a pathas-pathaḥ paripatiṁ vacasyā kāmena kṛto abhy ānaḷ arkam |
6.049.08c sa no rāsac churudhaś candrāgrā dhiyaṁ-dhiyaṁ sīṣadhāti pra pūṣā ||

6.049.09a प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम्।

6.049.09c होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा॥

6.049.09a prathamabhājaṁ yaśasaṁ vayodhāṁ supāṇiṁ devaṁ sugabhastim ṛbhvam |
6.049.09c hotā yakṣad yajatam pastyānām agnis tvaṣṭāraṁ suhavaṁ vibhāvā ||

6.049.10a भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ।

6.049.10c बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः॥

6.049.10a bhuvanasya pitaraṁ gīrbhir ābhī rudraṁ divā vardhayā rudram aktau |
6.049.10c bṛhantam ṛṣvam ajaraṁ suṣumnam ṛdhag ghuvema kavineṣitāsaḥ ||

6.049.11a आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम्।

6.049.11c अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत्॥

6.049.11a ā yuvānaḥ kavayo yajñiyāso maruto ganta gṛṇato varasyām |
6.049.11c acitraṁ cid dhi jinvathā vṛdhanta itthā nakṣanto naro aṅgirasvat ||

6.049.12a प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम्।

6.049.12c स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः॥

6.049.12a pra vīrāya pra tavase turāyājā yūtheva paśurakṣir astam |
6.049.12c sa pispṛśati tanvi śrutasya stṛbhir na nākaṁ vacanasya vipaḥ ||

6.049.13a यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय ।

6.049.13c तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च ॥

6.049.13a yo rajāṁsi vimame pārthivāni triś cid viṣṇur manave bādhitāya |
6.049.13c tasya te śarmann upadadyamāne rāyā madema tanvā3 tanā ca ||

6.049.14a तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।

6.049.14c तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥

6.049.14a tan no 'hir budhnyo adbhir arkais tat parvatas tat savitā cano dhāt |
6.049.14c tad oṣadhībhir abhi rātiṣāco bhagaḥ purandhir jinvatu pra rāye ||

6.049.15a नु नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।

6.049.15c क्षयं दाताजरं येन जनान्स्पृधो अदेवीरभि च क्रमाम विश आदेवीरभ्य१श्नवाम ॥

6.049.15a nu no rayiṁ rathyaṁ carṣaṇiprām puruvīram maha ṛtasya gopām |
6.049.15c kṣayaṁ dātājaraṁ yena janān spṛdho adevīr abhi ca kramāma viśa ādevīr abhy a1śnavāma
||

6.050.01a हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।

6.050.01c अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्सवितारं भगं च ॥

6.050.01a huve vo devīm aditiṁ namobhir mṛḷīkāya varuṇam mitram agnim |
6.050.01c abhikṣadām aryamaṇaṁ suśevaṁ trātṝn devān savitāram bhagaṁ ca ||

6.050.02a सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।

6.050.02c द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥

6.050.02a sujyotiṣaḥ sūrya dakṣapitṝn anāgāstve sumaho vīhi devān |
6.050.02c dvijanmāno ya ṛtasāpaḥ satyāḥ svarvanto yajatā agnijihvāḥ ||

6.050.03a उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने ।

6.050.03c महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ॥

6.050.03a uta dyāvāpṛthivī kṣatram uru bṛhad rodasī śaraṇaṁ suṣumne |
6.050.03c mahas karatho varivo yathā no 'sme kṣayāya dhiṣaṇe anehaḥ ||

6.050.04a आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः ।

6.050.04c यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥

6.050.04a ā no rudrasya sūnavo namantām adyā hūtāso vasavo 'dhṛṣṭāḥ |
6.050.04c yad īm arbhe mahati vā hitāso bādhe maruto ahvāma devān ||

6.050.05a मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।

6.050.05c श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥

6.050.05a mimyakṣa yeṣu rodasī nu devī siṣakti pūṣā abhyardhayajvā |
6.050.05c śrutvā havam maruto yad dha yātha bhūmā rejante adhvani pravikte ||

6.050.06a अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।

6.050.06c श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥

6.050.06a abhi tyaṁ vīraṁ girvaṇasam arcendram brahmaṇā jaritar navena |
6.050.06c śravad id dhavam upa ca stavāno rāsad vājām̐ upa maho gṛṇānaḥ ||

6.050.07a ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।

6.050.07c यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥

6.050.07a omānam āpo mānuṣīr amṛktaṁ dhāta tokāya tanayāya śaṁ yoḥ |
6.050.07c yūyaṁ hi ṣṭhā bhiṣajo mātṛtamā viśvasya sthātur jagato janitrīḥ ||

6.050.08a आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।

6.050.08c यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥

6.050.08a ā no devaḥ savitā trāyamāṇo hiraṇyapāṇir yajato jagamyāt |
6.050.08c yo datravām̐ uṣaso na pratīkaṁ vyūrṇute dāśuṣe vāryāṇi ||

6.050.09a उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।

6.050.09c स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ॥

6.050.09a uta tvaṁ sūno sahaso no adyā devām̐ asminn adhvare vavṛtyāḥ |
6.050.09c syām ahaṁ te sadam id rātau tava syām agne 'vasā suvīraḥ ||

6.050.10a उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा ।

6.050.10c अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥

6.050.10a uta tyā me havam ā jagmyātaṁ nāsatyā dhībhir yuvam aṅga viprā |
6.050.10c atriṁ na mahas tamaso 'mumuktaṁ tūrvataṁ narā duritād abhīke ||

6.050.11a ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।

6.050.11c दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥

6.050.11a te no rāyo dyumato vājavato dātāro bhūta nṛvataḥ purukṣoḥ |
6.050.11c daśasyanto divyāḥ pārthivāso gojātā apyā mṛḷatā ca devāḥ ||

6.050.12a ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।

6.050.12c ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥

6.050.12a te no rudraḥ sarasvatī sajoṣā mīḷhuṣmanto viṣṇur mṛḷantu vāyuḥ |
6.050.12c ṛbhukṣā vājo daivyo vidhātā parjanyāvātā pipyatām iṣaṁ naḥ ||

6.050.13a उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।

6.050.13c त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥

6.050.13a uta sya devaḥ savitā bhago no 'pāṁ napād avatu dānu papriḥ |
6.050.13c tvaṣṭā devebhir janibhiḥ sajoṣā dyaur devebhiḥ pṛthivī samudraiḥ ||

6.050.14a उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।

6.050.14c विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥

6.050.14a uta no 'hir budhnyaḥ śṛṇotv aja ekapāt pṛthivī samudraḥ |
6.050.14c viśve devā ṛtāvṛdho huvānā stutā mantrāḥ kaviśastā avantu ||

6.050.15a एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।

6.050.15c ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥

6.050.15a evā napāto mama tasya dhībhir bharadvājā abhy arcanty arkaiḥ |
6.050.15c gnā hutāso vasavo 'dhṛṣṭā viśve stutāso bhūtā yajatrāḥ ||

6.051.01a उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम् ।

6.051.01c ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥

6.051.01a ud u tyac cakṣur mahi mitrayor āṁ̐ eti priyaṁ varuṇayor adabdham |
6.051.01c ṛtasya śuci darśatam anīkaṁ rukmo na diva uditā vy adyaut ||

6.051.02a वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।

6.051.02c ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥

6.051.02a veda yas trīṇi vidathāny eṣāṁ devānāṁ janma sanutar ā ca vipraḥ |
6.051.02c ṛju marteṣu vṛjinā ca paśyann abhi caṣṭe sūro arya evān ||

6.051.03a स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान् ।

6.051.03c अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ॥

6.051.03a stuṣa u vo maha ṛtasya gopān aditim mitraṁ varuṇaṁ sujātān |
6.051.03c aryamaṇam bhagam adabdhadhītīn acchā voce sadhanyaḥ pāvakān ||

6.051.04a रिशादसः सत्पतीँरदब्धान्महो राज्ञः सुवसनस्य दातॄन् ।

6.051.04c यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्यान्याम्यदितिं दुवोयु ॥

6.051.04a riśādasaḥ satpatīṁ̐r adabdhān maho rājñaḥ suvasanasya dātṝn |
6.051.04c yūnaḥ sukṣatrān kṣayato divo nṝn ādityān yāmy aditiṁ duvoyu ||

6.051.05a द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।

6.051.05c विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥

6.051.05a dyau3ṣ pitaḥ pṛthivi mātar adhrug agne bhrātar vasavo mṛḷatā naḥ |
6.051.05c viśva ādityā adite sajoṣā asmabhyaṁ śarma bahulaṁ vi yanta ||

6.051.06a मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।

6.051.06c यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ॥

6.051.06a mā no vṛkāya vṛkye samasmā aghāyate rīradhatā yajatrāḥ |
6.051.06c yūyaṁ hi ṣṭhā rathyo nas tanūnāṁ yūyaṁ dakṣasya vacaso babhūva ||

6.051.07a मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।

6.051.07c विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ॥

6.051.07a mā va eno anyakṛtam bhujema mā tat karma vasavo yac cayadhve |
6.051.07c viśvasya hi kṣayatha viśvadevāḥ svayaṁ ripus tanvaṁ rīriṣīṣṭa ||

6.051.08a नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।

6.051.08c नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ॥

6.051.08a nama id ugraṁ nama ā vivāse namo dādhāra pṛthivīm uta dyām |
6.051.08c namo devebhyo nama īśa eṣāṁ kṛtaṁ cid eno namasā vivāse ||

6.051.09a ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।

6.051.09c ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्राः ॥

6.051.09a ṛtasya vo rathyaḥ pūtadakṣān ṛtasya pastyasado adabdhān |
6.051.09c tām̐ ā namobhir urucakṣaso nṝn viśvān va ā name maho yajatrāḥ ||

6.051.10a ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति ।

6.051.10c सुक्षत्रासो वरुणो मित्रो अग्निरृतधीतयो वक्मराजसत्याः ॥

6.051.10a te hi śreṣṭhavarcasas ta u nas tiro viśvāni duritā nayanti |
6.051.10c sukṣatrāso varuṇo mitro agnir ṛtadhītayo vakmarājasatyāḥ ||

6.051.11a ते न इन्द्रः पृथिवी क्षाम वर्धन्पूषा भगो अदितिः पञ्च जनाः ।

6.051.11c सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥

6.051.11a te na indraḥ pṛthivī kṣāma vardhan pūṣā bhago aditiḥ pañca janāḥ |
6.051.11c suśarmāṇaḥ svavasaḥ sunīthā bhavantu naḥ sutrātrāsaḥ sugopāḥ ||

6.051.12a नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।

6.051.12c आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द ॥

6.051.12a nū sadmānaṁ divyaṁ naṁśi devā bhāradvājaḥ sumatiṁ yāti hotā |
6.051.12c āsānebhir yajamāno miyedhair devānāṁ janma vasūyur vavanda ||

6.051.13a अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।

6.051.13c दविष्ठमस्य सत्पते कृधी सुगम् ॥

6.051.13a apa tyaṁ vṛjinaṁ ripuṁ stenam agne durādhyam |
6.051.13c daviṣṭham asya satpate kṛdhī sugam ||

6.051.14a ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।

6.051.14c जही न्यत्रिणं पणिं वृको हि षः ॥

6.051.14a grāvāṇaḥ soma no hi kaṁ sakhitvanāya vāvaśuḥ |
6.051.14c jahī ny a1triṇam paṇiṁ vṛko hi ṣaḥ ||

6.051.15a यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।

6.051.15c कर्ता नो अध्वन्ना सुगं गोपा अमा ॥

6.051.15a yūyaṁ hi ṣṭhā sudānava indrajyeṣṭhā abhidyavaḥ |
6.051.15c kartā no adhvann ā sugaṁ gopā amā ||

6.051.16a अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।

6.051.16c येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥

6.051.16a api panthām aganmahi svastigām anehasam |
6.051.16c yena viśvāḥ pari dviṣo vṛṇakti vindate vasu ||

6.052.01a न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।

6.052.01c उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा ॥

6.052.01a na tad divā na pṛthivyānu manye na yajñena nota śamībhir ābhiḥ |
6.052.01c ubjantu taṁ subhva1ḥ parvatāso ni hīyatām atiyājasya yaṣṭā ||

6.052.02a अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।

6.052.02c तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ॥

6.052.02a ati vā yo maruto manyate no brahma vā yaḥ kriyamāṇaṁ ninitsāt |
6.052.02c tapūṁṣi tasmai vṛjināni santu brahmadviṣam abhi taṁ śocatu dyauḥ ||

6.052.03a किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः ।

6.052.03c किमङ्ग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य ॥

6.052.03a kim aṅga tvā brahmaṇaḥ soma gopāṁ kim aṅga tvāhur abhiśastipāṁ naḥ |
6.052.03c kim aṅga naḥ paśyasi nidyamānān brahmadviṣe tapuṣiṁ hetim asya ||

6.052.04a अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।

6.052.04c अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ॥

6.052.04a avantu mām uṣaso jāyamānā avantu mā sindhavaḥ pinvamānāḥ |
6.052.04c avantu mā parvatāso dhruvāso 'vantu mā pitaro devahūtau ||

6.052.05a विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।

6.052.05c तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥

6.052.05a viśvadānīṁ sumanasaḥ syāma paśyema nu sūryam uccarantam |
6.052.05c tathā karad vasupatir vasūnāṁ devām̐ ohāno 'vasāgamiṣṭhaḥ ||

6.052.06a इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।

6.052.06c पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥

6.052.06a indro nediṣṭham avasāgamiṣṭhaḥ sarasvatī sindhubhiḥ pinvamānā |
6.052.06c parjanyo na oṣadhībhir mayobhur agniḥ suśaṁsaḥ suhavaḥ piteva ||

6.052.07a विश्वे देवास आ गत शृणुता म इमं हवम् ।

6.052.07c एदं बर्हिर्नि षीदत ॥

6.052.07a viśve devāsa ā gata śṛṇutā ma imaṁ havam |
6.052.07c edam barhir ni ṣīdata ||

6.052.08a यो वो देवा घृतस्नुना हव्येन प्रतिभूषति ।

6.052.08c तं विश्व उप गच्छथ ॥

6.052.08a yo vo devā ghṛtasnunā havyena pratibhūṣati |
6.052.08c taṁ viśva upa gacchatha ||

6.052.09a उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।

6.052.09c सुमृळीका भवन्तु नः ॥

6.052.09a upa naḥ sūnavo giraḥ śṛṇvantv amṛtasya ye |
6.052.09c sumṛḷīkā bhavantu naḥ ||

6.052.10a विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः ।

6.052.10c जुषन्तां युज्यं पयः ॥

6.052.10a viśve devā ṛtāvṛdha ṛtubhir havanaśrutaḥ |
6.052.10c juṣantāṁ yujyam payaḥ ||

6.052.11a स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा ।

6.052.11c इमा हव्या जुषन्त नः ॥

6.052.11a stotram indro marudgaṇas tvaṣṭṛmān mitro aryamā |
6.052.11c imā havyā juṣanta naḥ ||

6.052.12a इमं नो अग्ने अध्वरं होतर्वयुनशो यज ।

6.052.12c चिकित्वान्दैव्यं जनम् ॥

6.052.12a imaṁ no agne adhvaraṁ hotar vayunaśo yaja |
6.052.12c cikitvān daivyaṁ janam ||

6.052.13a विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।

6.052.13c ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥

6.052.13a viśve devāḥ śṛṇutemaṁ havam me ye antarikṣe ya upa dyavi ṣṭha |
6.052.13c ye agnijihvā uta vā yajatrā āsadyāsmin barhiṣi mādayadhvam ||

6.052.14a विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।

6.052.14c मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥

6.052.14a viśve devā mama śṛṇvantu yajñiyā ubhe rodasī apāṁ napāc ca manma |
6.052.14c mā vo vacāṁsi paricakṣyāṇi vocaṁ sumneṣv id vo antamā madema ||

6.052.15a ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।

6.052.15c ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥

6.052.15a ye ke ca jmā mahino ahimāyā divo jajñire apāṁ sadhasthe |
6.052.15c te asmabhyam iṣaye viśvam āyuḥ kṣapa usrā varivasyantu devāḥ ||

6.052.16a अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।

6.052.16c इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥

6.052.16a agnīparjanyāv avataṁ dhiyam me 'smin have suhavā suṣṭutiṁ naḥ |
6.052.16c iḷām anyo janayad garbham anyaḥ prajāvatīr iṣa ā dhattam asme ||

6.052.17a स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।

6.052.17c अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ॥

6.052.17a stīrṇe barhiṣi samidhāne agnau sūktena mahā namasā vivāse |
6.052.17c asmin no adya vidathe yajatrā viśve devā haviṣi mādayadhvam ||

6.053.01a वयमु त्वा पथस्पते रथं न वाजसातये ।

6.053.01c धिये पूषन्नयुज्महि ॥

6.053.01a vayam u tvā pathas pate rathaṁ na vājasātaye |
6.053.01c dhiye pūṣann ayujmahi ||

6.053.02a अभि नो नर्यं वसु वीरं प्रयतदक्षिणम् ।

6.053.02c वामं गृहपतिं नय ॥

6.053.02a abhi no naryaṁ vasu vīram prayatadakṣiṇam |
6.053.02c vāmaṁ gṛhapatiṁ naya ||

6.053.03a अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय ।

6.053.03c पणेश्चिद्वि म्रदा मनः ॥

6.053.03a aditsantaṁ cid āghṛṇe pūṣan dānāya codaya |
6.053.03c paṇeś cid vi mradā manaḥ ||

6.053.04a वि पथो वाजसातये चिनुहि वि मृधो जहि ।

6.053.04c साधन्तामुग्र नो धियः ॥

6.053.04a vi patho vājasātaye cinuhi vi mṛdho jahi |
6.053.04c sādhantām ugra no dhiyaḥ ||

6.053.05a परि तृन्धि पणीनामारया हृदया कवे ।

6.053.05c अथेमस्मभ्यं रन्धय ॥

6.053.05a pari tṛndhi paṇīnām ārayā hṛdayā kave |
6.053.05c athem asmabhyaṁ randhaya ||

6.053.06a वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् ।

6.053.06c अथेमस्मभ्यं रन्धय ॥

6.053.06a vi pūṣann ārayā tuda paner iccha hṛdi priyam |
6.053.06c athem asmabhyaṁ randhaya ||

6.053.07a आ रिख किकिरा कृणु पणीनां हृदया कवे ।

6.053.07c अथेमस्मभ्यं रन्धय ॥

6.053.07a ā rikha kikirā kṛṇu paṇīnāṁ hṛdayā kave |
6.053.07c athem asmabhyaṁ randhaya ||

6.053.08a यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे ।

6.053.08c तया समस्य हृदयमा रिख किकिरा कृणु ॥

6.053.08a yām pūṣan brahmacodanīm ārām bibharṣy āghṛṇe |
6.053.08c tayā samasya hṛdayam ā rikha kikirā kṛṇu ||

6.053.09a या ते अष्ट्रा गोपशाघृणे पशुसाधनी ।

6.053.09c तस्यास्ते सुम्नमीमहे ॥

6.053.09a yā te aṣṭrā goopaśāghṛṇe paśusādhanī |
6.053.09c tasyās te sumnam īmahe ||

6.053.10a उत नो गोषणिं धियमश्वसां वाजसामुत ।

6.053.10c नृवत्कृणुहि वीतये ॥

6.053.10a uta no goṣaṇiṁ dhiyam aśvasāṁ vājasām uta |
6.053.10c nṛvat kṛṇuhi vītaye ||

6.054.01a सं पूषन्विदुषा नय यो अञ्जसानुशासति ।

6.054.01c य एवेदमिति ब्रवत् ॥

6.054.01a sam pūṣan viduṣā naya yo añjasānuśāsati |
6.054.01c ya evedam iti bravat ||

6.054.02a समु पूष्णा गमेमहि यो गृहाँ अभिशासति ।

6.054.02c इम एवेति च ब्रवत् ॥

6.054.02a sam u pūṣṇā gamemahi yo gṛhām̐ abhiśāsati |
6.054.02c ima eveti ca bravat ||

6.054.03a पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते ।

6.054.03c नो अस्य व्यथते पविः ॥

6.054.03a pūṣṇaś cakraṁ na riṣyati na kośo 'va padyate |

6.054.03c no asya vyathate paviḥ ||

6.054.04a यो अस्मै हविषाविधन्न तं पूषापि मृष्यते ।

6.054.04c प्रथमो विन्दते वसु ॥

6.054.04a yo asmai haviṣāvidhan na tam pūṣāpi mṛṣyate |

6.054.04c prathamo vindate vasu ||

6.054.05a पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ।

6.054.05c पूषा वाजं सनोतु नः ॥

6.054.05a pūṣā gā anv etu naḥ pūṣā rakṣatv arvataḥ |

6.054.05c pūṣā vājaṁ sanotu naḥ ||

6.054.06a पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः ।

6.054.06c अस्माकं स्तुवतामुत ॥

6.054.06a pūṣann anu pra gā ihi yajamānasya sunvataḥ |

6.054.06c asmākaṁ stuvatām uta ||

6.054.07a माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे ।

6.054.07c अथारिष्टाभिरा गहि ॥

6.054.07a mākir neśan mākīṁ riṣan mākīṁ saṁ śāri kevaṭe |

6.054.07c athāriṣṭābhir ā gahi ||

6.054.08a शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम् ।

6.054.08c ईशानं राय ईमहे ॥

6.054.08a śṛṇvantam pūṣaṇaṁ vayam iryam anaṣṭavedasam |

6.054.08c īśānaṁ rāya īmahe ||

6.054.09a पूषन्तव व्रते वयं न रिष्येम कदा चन ।

6.054.09c स्तोतारस्त इह स्मसि ॥

6.054.09a pūṣan tava vrate vayaṁ na riṣyema kadā cana |
6.054.09c stotāras ta iha smasi ||

6.054.10a परि पूषा परस्ताद्धस्तं दधातु दक्षिणम् ।

6.054.10c पुनर्नो नष्टमाजतु ॥

6.054.10a pari pūṣā parastād dhastaṁ dadhātu dakṣiṇam |
6.054.10c punar no naṣṭam ājatu ||

6.055.01a एहि वां विमुचो नपादाघृणे सं सचावहै ।

6.055.01c रथीर्ऋतस्य नो भव ॥

6.055.01a ehi vāṁ vimuco napād āghṛṇe saṁ sacāvahai |
6.055.01c rathīr ṛtasya no bhava ||

6.055.02a रथीतमं कपर्दिनमीशानं राधसो महः ।

6.055.02c रायः सखायमीमहे ॥

6.055.02a rathītamaṁ kapardinam īśānaṁ rādhaso mahaḥ |
6.055.02c rāyaḥ sakhāyam īmahe ||

6.055.03a रायो धारास्याघृणे वसो राशिरजाश्व ।

6.055.03c धीवतोधीवतः सखा ॥

6.055.03a rāyo dhārāsy āghṛṇe vaso rāśir ajāśva |
6.055.03c dhīvato-dhīvataḥ sakhā ||

6.055.04a पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम् ।

6.055.04c स्वसुर्यो जार उच्यते ॥

6.055.04a pūṣaṇaṁ nv a1jāśvam upa stoṣāma vājinam |
6.055.04c svasur yo jāra ucyate ||

6.055.05a मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः ।

6.055.05c भ्रातेन्द्रस्य सखा मम ॥

6.055.05a mātur didhiṣum abravaṁ svasur jāraḥ śṛṇotu naḥ |
6.055.05c bhrātendrasya sakhā mama ||

6.055.06a आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् ।
6.055.06c देवं वहन्तु बिभ्रतः ॥

6.055.06a ājāsaḥ pūṣaṇaṁ rathe niśṛmbhās te janaśriyam |
6.055.06c devaṁ vahantu bibhrataḥ ||

6.056.01a य एनमादिदेशति करम्भादिति पूषणम् ।
6.056.01c न तेन देव आदिशे ॥

6.056.01a ya enam ādideśati karambhād iti pūṣaṇam |
6.056.01c na tena deva ādiśe ||

6.056.02a उत घा स रथीतमः सख्या सत्पतिर्युजा ।
6.056.02c इन्द्रो वृत्राणि जिघ्नते ॥

6.056.02a uta ghā sa rathītamaḥ sakhyā satpatir yujā |
6.056.02c indro vṛtrāṇi jighnate ||

6.056.03a उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् ।
6.056.03c न्यैरयद्रथीतमः ॥

6.056.03a utādaḥ paruṣe gavi sūraś cakraṁ hiraṇyayam |
6.056.03c ny airayad rathītamaḥ ||

6.056.04a यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः ।
6.056.04c तत्सु नो मन्म साधय ॥

6.056.04a yad adya tvā puruṣṭuta bravāma dasra mantumaḥ |
6.056.04c tat su no manma sādhaya ||

6.056.05a इमं च नो गवेषणं सातये सीषधो गणम् ।
6.056.05c आरात्पूषन्नसि श्रुतः ॥

6.056.05a imaṁ ca no gaveṣaṇaṁ sātaye sīṣadho gaṇam |
6.056.05c ārāt pūṣann asi śrutaḥ ||

6.056.06a आ ते स्वस्तिमीमह आरेअघामुपावसुम् ।

6.056.06c अद्या च सर्वतातये श्वश्च सर्वतातये ॥

6.056.06a ā te svastim īmaha āreaghām upāvasum |
6.056.06c adyā ca sarvatātaye śvaś ca sarvatātaye ||

6.057.01a इन्द्रा नु पूषणा वयं सख्याय स्वस्तये ।

6.057.01c हुवेम वाजसातये ॥

6.057.01a indrā nu pūṣaṇā vayaṁ sakhyāya svastaye |
6.057.01c huvema vājasātaye ||

6.057.02a सोममन्य उपासदत्पातवे चम्वोः सुतम् ।

6.057.02c करम्भमन्य इच्छति ॥

6.057.02a somam anya upāsadat pātave camvoḥ sutam |
6.057.02c karambham anya icchati ||

6.057.03a अजा अन्यस्य वह्नयो हरी अन्यस्य सम्भृता ।

6.057.03c ताभ्यां वृत्राणि जिघ्नते ॥

6.057.03a ajā anyasya vahnayo harī anyasya sambhṛtā |
6.057.03c tābhyāṁ vṛtrāṇi jighnate ||

6.057.04a यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः ।

6.057.04c तत्र पूषाभवत्सचा ॥

6.057.04a yad indro anayad rito mahīr apo vṛṣantamaḥ |
6.057.04c tatra pūṣābhavat sacā ||

6.057.05a तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव ।

6.057.05c इन्द्रस्य चा रभामहे ॥

6.057.05a tām pūṣṇaḥ sumatiṁ vayaṁ vṛkṣasya pra vayām iva |
6.057.05c indrasya cā rabhāmahe ||

6.057.06a उत्पूषणं युवामहेऽभीशूँरिव सारथिः ।

6.057.06c मह्या इन्द्रं स्वस्तये ॥

6.057.06a ut pūṣaṇaṁ yuvāmahe 'bhīśūṁr iva sārathiḥ |
6.057.06c mahyā indraṁ svastaye ||

6.058.01a शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।

6.058.01c विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥

6.058.01a śukraṁ te anyad yajataṁ te anyad viṣurūpe ahanī dyaur ivāsi |
6.058.01c viśvā hi māyā avasi svadhāvo bhadrā te pūṣann iha rātir astu ||

6.058.02a अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।

6.058.02c अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥

6.058.02a ajāśvaḥ paśupā vājapastyo dhiyañjinvo bhuvane viśve arpitaḥ |
6.058.02c aṣṭrām pūṣā śithirām udvarīvṛjat sañcakṣāṇo bhuvanā deva īyate ||

6.058.03a यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।

6.058.03c ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥

6.058.03a yās te pūṣan nāvo antaḥ samudre hiraṇyayīr antarikṣe caranti |
6.058.03c tābhir yāsi dūtyāṁ sūryasya kāmena kṛta śrava icchamānaḥ ||

6.058.04a पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।

6.058.04c यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ॥

6.058.04a pūṣā subandhur diva ā pṛthivyā iḻas patir maghavā dasmavarcāḥ |
6.058.04c yaṁ devāso adaduḥ sūryāyai kāmena kṛtaṁ tavasaṁ svañcam ||

6.059.01a प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।

6.059.01c हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् ॥

6.059.01a pra nu vocā suteṣu vāṁ vīryā3 yāni cakrathuḥ |
6.059.01c hatāso vām pitaro devaśatrava indrāgnī jīvatho yuvam ||

6.059.02a बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ ।

6.059.02c समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा ॥

6.059.02a bal itthā mahimā vām indrāgnī paniṣṭha ā |
6.059.02c samāno vāṁ janitā bhrātarā yuvaṁ yamāv ihehamātarā ||

6.059.03a ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।

6.059.03c इन्द्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥

6.059.03a okivāṁsā sute sacām̐ aśvā saptī ivādane |
6.059.03c indrā nv a1gnī avaseha vajriṇā vayaṁ devā havāmahe ||

6.059.04a य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।

6.059.04c जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥

6.059.04a ya indrāgnī suteṣu vāṁ stavat teṣv ṛtāvṛdhā |
6.059.04c joṣavākaṁ vadataḥ pajrahoṣiṇā na devā bhasathaś cana ||

6.059.05a इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।

6.059.05c विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥

6.059.05a indrāgnī ko asya vāṁ devau martaś ciketati |
6.059.05c viṣūco aśvān yuyujāna īyata ekaḥ samāna ā rathe ||

6.059.06a इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।

6.059.06c हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत् ॥

6.059.06a indrāgnī apād iyam pūrvāgāt padvatībhyaḥ |
6.059.06c hitvī śiro jihvayā vāvadac carat triṁśat padā ny akramīt ||

6.059.07a इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।

6.059.07c मा नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥

6.059.07a indrāgnī ā hi tanvate naro dhanvāni bāhvoḥ |
6.059.07c mā no asmin mahādhane parā varktaṁ gaviṣṭiṣu ||

6.059.08a इन्द्राग्नी तपन्ति माघा अर्यो अरातयः ।

6.059.08c अप द्वेषांस्या कृतं युयुतं सूर्यादधि ॥

6.059.08a indrāgnī tapanti māghā aryo arātayaḥ |

6.059.08c apa dveṣāṁsy ā kṛtaṁ yuyutaṁ sūryād adhi ||

6.059.09a इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा ।

6.059.09c आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ॥

6.059.09a indrāgnī yuvor api vasu divyāni pārthivā |
6.059.09c ā na iha pra yacchataṁ rayiṁ viśvāyupoṣasam ||

6.059.10a इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।

6.059.10c विश्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये ॥

6.059.10a indrāgnī ukthavāhasā stomebhir havanaśrutā |
6.059.10c viśvābhir gīrbhir ā gatam asya somasya pītaye ||

6.060.01a श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।

6.060.01c इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥

6.060.01a śnathad vṛtram uta sanoti vājam indrā yo agnī sahurī saparyāt |
6.060.01c irajyantā vasavyasya bhūreḥ sahastamā sahasā vājayantā ||

6.060.02a ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः ।

6.060.02c दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥

6.060.02a tā yodhiṣṭam abhi gā indra nūnam apaḥ svar uṣaso agna ūḷhāḥ |
6.060.02c diśaḥ svar uṣasa indra citrā apo gā agne yuvase niyutvān ||

6.060.03a आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्र यातं नमोभिरग्ने अर्वाक् ।

6.060.03c युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः ॥

6.060.03a ā vṛtrahaṇā vṛtrahabhiḥ śuṣmair indra yātaṁ namobhir agne arvāk |
6.060.03c yuvaṁ rādhobhir akavebhir indrāgne asme bhavatam uttamebhiḥ ||

6.060.04a ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् ।

6.060.04c इन्द्राग्नी न मर्धतः ॥

6.060.04a tā huve yayor idam papne viśvam purā kṛtam |
6.060.04c indrāgnī na mardhataḥ ||

6.060.05a उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।

6.060.05c ता नो मृळात ईदृशे ॥

6.060.05a ugrā vighaninā mṛdha indrāgnī havāmahe |
6.060.05c tā no mṛḷāta īdṛśe ||

6.060.06a हतो वृत्राण्यार्या हतो दासानि सत्पती ।

6.060.06c हतो विश्वा अप द्विषः ॥

6.060.06a hato vṛtrāṇy āryā hato dāsāni satpatī |
6.060.06c hato viśvā apa dviṣaḥ ||

6.060.07a इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत ।

6.060.07c पिबतं शम्भुवा सुतम् ॥

6.060.07a indrāgnī yuvām ime3 'bhi stomā anūṣata |
6.060.07c pibataṁ śambhuvā sutam ||

6.060.08a या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।

6.060.08c इन्द्राग्नी ताभिरा गतम् ॥

6.060.08a yā vāṁ santi puruspṛho niyuto dāśuṣe narā |
6.060.08c indrāgnī tābhir ā gatam ||

6.060.09a ताभिरा गच्छतं नरोपेदं सवनं सुतम् ।

6.060.09c इन्द्राग्नी सोमपीतये ॥

6.060.09a tābhir ā gacchataṁ naropedaṁ savanaṁ sutam |
6.060.09c indrāgnī somapītaye ||

6.060.10a तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।

6.060.10c कृष्णा कृणोति जिह्वया ॥

6.060.10a tam īḷiṣva yo arciṣā vanā viśvā pariṣvajat |
6.060.10c kṛṣṇā kṛṇoti jihvayā ||

6.060.11a य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः ।

6.060.11c द्युम्नाय सुतरा अपः ॥

6.060.11a ya iddha āvivāsati sumnam indrasya martyaḥ |
6.060.11c dyumnāya sutarā apaḥ ||

6.060.12a ता नो वाजवतीरिष आशून्पिपृतमर्वतः ।

6.060.12c इन्द्रमग्निं च वोळ्हवे ॥

6.060.12a tā no vājavatīr iṣa āśūn pipṛtam arvataḥ |
6.060.12c indram agniṁ ca volhave ||

6.060.13a उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।

6.060.13c उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥

6.060.13a ubhā vām indrāgnī āhuvadhyā ubhā rādhasaḥ saha mādayadhyai |
6.060.13c ubhā dātārāv iṣāṁ rayīṇām ubhā vājasya sātaye huve vām ||

6.060.14a आ नो गव्येभिरश्व्यैर्वसव्यै३रुप गच्छतम् ।

6.060.14c सखायौ देवौ सख्याय शम्भुवेन्द्राग्नी ता हवामहे ॥

6.060.14a ā no gavyebhir aśvyair vasavyai3r upa gacchatam |
6.060.14c sakhāyau devau sakhyāya śambhuvendrāgnī tā havāmahe ||

6.060.15a इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।

6.060.15c वीतं हव्यान्या गतं पिबतं सोम्यं मधु ॥

6.060.15a indrāgnī śṛṇutaṁ havaṁ yajamānasya sunvataḥ |
6.060.15c vītaṁ havyāny ā gatam pibataṁ somyam madhu ||

6.061.01a इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।

6.061.01c या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥

6.061.01a iyam adadād rabhasam ṛṇacyutaṁ divodāsaṁ vadhryaśvāya dāśuṣe |
6.061.01c yā śaśvantam ācakhādāvasam paṇiṁ tā te dātrāṇi taviṣā sarasvati ||

6.061.02a इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।

6.061.02c पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥

6.061.02a iyaṁ śuṣmebhir bisakhā ivārujat sānu girīṇāṁ taviṣebhir ūrmibhiḥ |
6.061.02c pārāvataghnīm avase suvṛktibhiḥ sarasvatīm ā vivāsema dhītibhiḥ ||

6.061.03a सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।

6.061.03c उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ॥

6.061.03a sarasvati devanido ni barhaya prajāṁ viśvasya bṛsayasya māyinaḥ |
6.061.03c uta kṣitibhyo 'vanīr avindo viṣam ebhyo asravo vājinīvati ||

6.061.04a प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती ।

6.061.04c धीनामवित्र्यवतु ॥

6.061.04a pra ṇo devī sarasvatī vājebhir vājinīvatī |
6.061.04c dhīnām avitry avatu ||

6.061.05a यस्त्वा देवि सरस्वत्युपब्रूते धने हिते ।

6.061.05c इन्द्रं न वृत्रतूर्ये ॥

6.061.05a yas tvā devi sarasvaty upabrūte dhane hite |
6.061.05c indraṁ na vṛtratūrye ||

6.061.06a त्वं देवि सरस्वत्यवा वाजेषु वाजिनि ।

6.061.06c रदा पूषेव नः सनिम् ॥

6.061.06a tvaṁ devi sarasvaty avā vājeṣu vājini |
6.061.06c radā pūṣeva naḥ sanim ||

6.061.07a उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः ।

6.061.07c वृत्रघ्नी वष्टि सुष्टुतिम् ॥

6.061.07a uta syā naḥ sarasvatī ghorā hiraṇyavartaniḥ |
6.061.07c vṛtraghnī vaṣṭi suṣṭutim ||

6.061.08a यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः ।

6.061.08c अमश्चरति रोरुवत् ॥

6.061.08a yasyā ananto ahrutas tveṣaś cariṣṇur arṇavaḥ |
6.061.08c amaś carati roruvat ||

6.061.09a सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी ।

6.061.09c अतन्नहेव सूर्यः ॥

6.061.09a sā no viśvā ati dviṣaḥ svasṝr anyā ṛtāvarī |
6.061.09c atann aheva sūryaḥ ||

6.061.10a उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।

6.061.10c सरस्वती स्तोम्या भूत् ॥

6.061.10a uta naḥ priyā priyāsu saptasvasā sujuṣṭā |
6.061.10c sarasvatī stomyā bhūt ||

6.061.11a आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् ।

6.061.11c सरस्वती निदस्पातु ॥

6.061.11a āpapruṣī pārthivāny uru rajo antarikṣam |
6.061.11c sarasvatī nidas pātu ||

6.061.12a त्रिषधस्था सप्तधातुः पञ्च जाता वर्धयन्ती ।

6.061.12c वाजेवाजे हव्या भूत् ॥

6.061.12a triṣadhasthā saptadhātuḥ pañca jātā vardhayantī |
6.061.12c vāje-vāje havyā bhūt ||

6.061.13a प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।

6.061.13c रथ इव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ॥

6.061.13a pra yā mahimnā mahināsu cekite dyumnebhir anyā apasām apastamā |
6.061.13c ratha iva bṛhatī vibhvane kṛtopastutyā cikituṣā sarasvatī ||

6.061.14a सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।

6.061.14c जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥

6.061.14a sarasvaty abhi no neṣi vasyo māpa spharīḥ payasā mā na ā dhak |
6.061.14c juṣasva naḥ sakhyā veśyā ca mā tvat kṣetrāṇy araṇāni ganma ||

6.062.01a स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जरमाणो अर्कैः ।

6.062.01c या सद्य उस्रा व्युषि ज्मो अन्तान्युयूषतः पर्युरू वरांसि ॥

6.062.01a stuṣe narā divo asya prasantāśvinā huve jaramāṇo arkaiḥ |
6.062.01c yā sadya usrā vyuṣi jmo antān yuyūṣataḥ pary urū varāṁsi ||

6.062.02a ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।

6.062.02c पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान् ॥

6.062.02a tā yajñam ā śucibhiś cakramāṇā rathasya bhānuṁ rurucū rajobhiḥ |
6.062.02c purū varāṁsy amitā mimānāpo dhanvāny ati yātho ajrān ||

6.062.03a ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः ।

6.062.03c मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥

6.062.03a tā ha tyad vartir yad aradhram ugretthā dhiya ūhathuḥ śaśvad aśvaiḥ |
6.062.03c manojavebhir iṣiraiḥ śayadhyai pari vyathir dāśuṣo martyasya ||

6.062.04a ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।

6.062.04c शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना ॥

6.062.04a tā navyaso jaramāṇasya manmopa bhūṣato yuyujānasaptī |
6.062.04c śubham pṛkṣam iṣam ūrjaṁ vahantā hotā yakṣat pratno adhrug yuvānā ||

6.062.05a ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।

6.062.05c या शंसते स्तुवते शम्भविष्ठा बभूवतुर्गृणते चित्रराती ॥

6.062.05a tā valgū dasrā puruśākatamā pratnā navyasā vacasā vivāse |
6.062.05c yā śaṁsate stuvate śambhaviṣṭhā babhūvatur gṛṇate citrarātī ||

6.062.06a ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः ।

6.062.06c अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात् ॥

6.062.06a tā bhujyuṁ vibhir adbhyaḥ samudrāt tugrasya sūnum ūhathū rajobhiḥ |
6.062.06c areṇubhir yojanebhir bhujantā patatribhir arṇaso nir upasthāt ||

6.062.07a वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।

6.062.07c दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥

6.062.07a vi jayuṣā rathyā yātam adriṁ śrutaṁ havaṁ vṛṣaṇā vadhrimatyāḥ |

6.062.07c daśasyantā śayave pipyathur gām iti cyavānā sumatim bhuraṇyū ||

6.062.08a यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।

6.062.08c तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥

6.062.08a yad rodasī pradivo asti bhūmā heḷo devānām uta martyatrā |
6.062.08c tad ādityā vasavo rudriyāso rakṣoyuje tapur aghaṁ dadhāta ||

6.062.09a य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत् ।

6.062.09c गम्भीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस आनवाय ॥

6.062.09a ya īṁ rājānāv ṛtuthā vidadhad rajaso mitro varuṇaś ciketat |
6.062.09c gambhīrāya rakṣase hetim asya droghāya cid vacasa ānavāya ||

6.062.10a अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।

6.062.10c सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् ॥

6.062.10a antaraiś cakrais tanayāya vartir dyumatā yātaṁ nṛvatā rathena |
6.062.10c sanutyena tyajasā martyasya vanuṣyatām api śīrṣā vavṛktam ||

6.062.11a आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।

6.062.11c दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥

6.062.11a ā paramābhir uta madhyamābhir niyudbhir yātam avamābhir arvāk |
6.062.11c dṛḷhasya cid gomato vi vrajasya duro vartaṁ gṛṇate citrarātī ||

6.063.01a क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान् ।

6.063.01c आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् ॥

6.063.01a kva1 tyā valgū puruhūtādya dūto na stomo 'vidan namasvān |
6.063.01c ā yo arvāṅ nāsatyā vavarta preṣṭhā hy asatho asya manman ||

6.063.02a अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः ।

6.063.02c परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नान्तरस्तुतुर्यात् ॥

6.063.02a aram me gantaṁ havanāyāsmai gṛṇānā yathā pibātho andhaḥ |
6.063.02c pari ha tyad vartir yātho riṣo na yat paro nāntaras tuturyāt ||

6.063.03a अकारि वामन्धसो वरीमन्नस्तारि बर्हिः सुप्रायणतमम् ।

6.063.03c उत्तानहस्तो युवयुर्ववन्दा वां नक्षन्तो अद्रय आञ्जन् ॥

6.063.03a akāri vām andhaso varīmann astāri barhiḥ suprāyaṇatamam |
6.063.03c uttānahasto yuvayur vavandā vāṁ nakṣanto adraya āñjan ||

6.063.04a ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।

6.063.04c प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥

6.063.04a ūrdhvo vām agnir adhvareṣv asthāt pra rātir eti jūrṇinī ghṛtācī |
6.063.04c pra hotā gūrtamanā urāṇo 'yukta yo nāsatyā havīman ||

6.063.05a अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।

6.063.05c प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानाम् ॥

6.063.05a adhi śriye duhitā sūryasya rathaṁ tasthau purubhujā śatotim |
6.063.05c pra māyābhir māyinā bhūtam atra narā nṛtū janiman yajñiyānām ||

6.063.06a युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।

6.063.06c प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वाम् ॥

6.063.06a yuvaṁ śrībhir darśatābhir ābhiḥ śubhe puṣṭim ūhathuḥ sūryāyāḥ |
6.063.06c pra vāṁ vayo vapuṣe 'nu paptan nakṣad vāṇī suṣṭutā dhiṣṇyā vām ||

6.063.07a आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु ।

6.063.07c प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥

6.063.07a ā vāṁ vayo 'śvāso vahiṣṭhā abhi prayo nāsatyā vahantu |
6.063.07c pra vāṁ ratho manojavā asarjīṣaḥ pṛkṣa iṣidho anu pūrvīḥ ||

6.063.08a पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्राम् ।

6.063.08c स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ॥

6.063.08a puru hi vām purubhujā deṣṇaṁ dhenuṁ na iṣam pinvatam asakrām |
6.063.08c stutaś ca vām mādhvī suṣṭutiś ca rasāś ca ye vām anu rātim agman ||

6.063.09a उत म ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्वा ।

6.063.09c शण्डो दाद्धिरणिनः स्मद्दिष्टीन्दश वशासो अभिषाच ऋष्वान् ॥

6.063.09a uta ma ṛjre purayasya raghvī sumīḻhe śatam peruke ca pakvā |
6.063.09c śaṇḍo dād dhiraṇinaḥ smaddiṣṭīn daśa vaśāso abhiṣāca ṛṣvān ||

6.063.10a सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात् ।

6.063.10c भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥

6.063.10a saṁ vāṁ śatā nāsatyā sahasrāśvānām purupanthā gire dāt |
6.063.10c bharadvājāya vīra nū gire dād dhatā rakṣāṁsi purudaṁsasā syuḥ ||

6.063.11a आ वां सुम्ने वरिमन्सूरिभिः ष्याम् ॥

6.063.11a ā vāṁ sumne variman sūribhiḥ ṣyām ||

6.064.01a उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।

6.064.01c कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥

6.064.01a ud u śriya uṣaso rocamānā asthur apāṁ normayo ruśantaḥ |
6.064.01c kṛṇoti viśvā supathā sugāny abhūd u vasvī dakṣiṇā maghonī ||

6.064.02a भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।

6.064.02c आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥

6.064.02a bhadrā dadṛkṣa urviyā vi bhāsy ut te śocir bhānavo dyām apaptan |
6.064.02c āvir vakṣaḥ kṛṇuṣe śumbhamānoṣo devi rocamānā mahobhiḥ ||

6.064.03a वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् ।

6.064.03c अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळ्हा ॥

6.064.03a vahanti sīm aruṇāso ruśanto gāvaḥ subhagām urviyā prathānām |
6.064.03c apejate śūro asteva śatrūn bādhate tamo ajiro na voḻhā ||

6.064.04a सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो ।

6.064.04c सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै ॥

6.064.04a sugota te supathā parvateṣv avāte apas tarasi svabhāno |
6.064.04c sā na ā vaha pṛthuyāmann ṛṣve rayiṁ divo duhitar iṣayadhyai ||

6.064.05a सा वह योक्षभिरवातोषो वरं वहसि जोषमनु ।

6.064.05c त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥

6.064.05a sā vaha yokṣabhir avātoṣo varaṁ vahasi joṣam anu |
6.064.05c tvaṁ divo duhitar yā ha devī pūrvahūtau maṁhanā darśatā bhūḥ ||

6.064.06a उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।

6.064.06c अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥

6.064.06a ut te vayaś cid vasater apaptan naraś ca ye pitubhājo vyuṣṭau |
6.064.06c amā sate vahasi bhūri vāmam uṣo devi dāśuṣe martyāya ||

6.065.01a एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।

6.065.01c या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून् ॥

6.065.01a eṣā syā no duhitā divojāḥ kṣitīr ucchantī mānuṣīr ajīgaḥ |
6.065.01c yā bhānunā ruśatā rāmyāsv ajñāyi tiras tamasaś cid aktūn ||

6.065.02a वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः ।

6.065.02c अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः ॥

6.065.02a vi tad yayur aruṇayugbhir aśvaiś citram bhānty uṣasaś candrarathāḥ |
6.065.02c agraṁ yajñasya bṛhato nayantīr vi tā bādhante tama ūrmyāyāḥ ||

6.065.03a श्रवो वाजमिषमूर्जं वहन्तीर्नि दाशुष उषसो मर्त्याय ।

6.065.03c मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥

6.065.03a śravo vājam iṣam ūrjaṁ vahantīr ni dāśuṣa uṣaso martyāya |
6.065.03c maghonīr vīravat patyamānā avo dhāta vidhate ratnam adya ||

6.065.04a इदा हि वो विधते रत्नमस्तीदा वीराय दाशुष उषासः ।

6.065.04c इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ॥

6.065.04a idā hi vo vidhate ratnam astīdā vīrāya dāśuṣa uṣāsaḥ |
6.065.04c idā viprāya jarate yad ukthā ni ṣma māvate vahathā purā cit ||

6.065.05a इदा हि त उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति ।

6.065.05c व्यर्꣡केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥

6.065.05a idā hi ta uṣo adrisāno gotrā gavām aṅgiraso gṛṇanti |
6.065.05c vy a1rkeṇa bibhidur brahmaṇā ca satyā nṛṇām abhavad devahūtiḥ ||

6.065.06a उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि ।

6.065.06c सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥

6.065.06a ucchā divo duhitaḥ pratnavan no bharadvājavad vidhate maghoni |
6.065.06c suvīraṁ rayiṁ gṛṇate rirīhy urugāyam adhi dhehi śravo naḥ ||

6.066.01a वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।

6.066.01c मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥

6.066.01a vapur nu tac cikituṣe cid astu samānaṁ nāma dhenu patyamānam |
6.066.01c marteṣv anyad dohase pīpāya sakṛc chukraṁ duduhe pṛśnir ūdhaḥ ||

6.066.02a ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त ।

6.066.02c अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥

6.066.02a ye agnayo na śośucann idhānā dvir yat trir maruto vāvṛdhanta |
6.066.02c areṇavo hiraṇyayāsa eṣāṁ sākaṁ nṛmṇaiḥ pauṁsyebhiś ca bhūvan ||

6.066.03a रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा याँश्चो नु दाधृविर्भरध्यै ।

6.066.03c विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे३ गर्भमाधात् ॥

6.066.03a rudrasya ye mīḻhuṣaḥ santi putrā yāṁś co nu dādhṛvir bharadhyai |
6.066.03c vide hi mātā maho mahī ṣā set pṛśniḥ subhve3 garbham ādhāt ||

6.066.04a न य ईषन्ते जनुषोऽया न्वऽन्तः सन्तोऽवद्यानि पुनानाः ।

6.066.04c निर्यद्दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥

6.066.04a na ya īṣante januṣo 'yā nv a1ntaḥ santo 'vadyāni punānāḥ |
6.066.04c nir yad duhre śucayo 'nu joṣam anu śriyā tanvam ukṣamāṇāḥ ||

6.066.05a मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।

6.066.05c न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥

6.066.05a makṣū na yeṣu dohase cid ayā ā nāma dhṛṣṇu mārutaṁ dadhānāḥ |
6.066.05c na ye staunā ayāso mahnā nū cit sudānur ava yāsad ugrān ||

6.066.06a त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।

6.066.06c अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ॥

6.066.06a ta id ugrāḥ śavasā dhṛṣṇuṣeṇā ubhe yujanta rodasī sumeke |
6.066.06c adha smaiṣu rodasī svaśocir āmavatsu tasthau na rokaḥ ||

6.066.07a अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः ।

6.066.07c अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥

6.066.07a aneno vo maruto yāmo astv anaśvaś cid yam ajaty arathīḥ |
6.066.07c anavaso anabhīśū rajastūr vi rodasī pathyā yāti sādhan ||

6.066.08a नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।

6.066.08c तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ॥

6.066.08a nāsya vartā na tarutā nv asti maruto yam avatha vājasātau |
6.066.08c toke vā goṣu tanaye yam apsu sa vrajaṁ dartā pārye adha dyoḥ ||

6.066.09a प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।

6.066.09c ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥

6.066.09a pra citram arkaṁ gṛṇate turāya mārutāya svatavase bharadhvam |
6.066.09c ye sahāṁsi sahasā sahante rejate agne pṛthivī makhebhyaḥ ||

6.066.10a त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः ।

6.066.10c अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥

6.066.10a tviṣīmanto adhvarasyeva didyut tṛṣucyavaso juhvo3 nāgneḥ |
6.066.10c arcatrayo dhunayo na vīrā bhrājajjanmāno maruto adhṛṣṭāḥ ||

6.066.11a तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।

6.066.11c दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥

6.066.11a taṁ vṛdhantam mārutam bhrājadṛṣṭiṁ rudrasya sūnuṁ havasā vivāse |
6.066.11c divaḥ śardhāya śucayo manīṣā girayo nāpa ugrā aspṛdhran ||

6.067.01a विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।

6.067.01c सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥

6.067.01a viśveṣāṁ vaḥ satāṁ jyeṣṭhatamā gīrbhir mitrāvaruṇā vāvṛdhadhyai |
6.067.01c saṁ yā raśmeva yamatur yamiṣṭhā dvā janām̐ asamā bāhubhiḥ svaiḥ ||

6.067.02a इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ ।

6.067.02c यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू ॥

6.067.02a iyam mad vām pra stṛṇīte manīṣopa priyā namasā barhir accha |
6.067.02c yantaṁ no mitrāvaruṇāv adhṛṣṭaṁ chardir yad vāṁ varūthyaṁ sudānū ||

6.067.03a आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।

6.067.03c सं यावप्नस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यतथो महित्वा ॥

6.067.03a ā yātam mitrāvaruṇā suśasty upa priyā namasā hūyamānā |
6.067.03c saṁ yāv apnastho apaseva janāñ chrudhīyataś cid yatatho mahitvā ||

6.067.04a अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै ।

6.067.04c प्र या महि महान्ता जायमाना घोरा मर्ताय रिपवे नि दीधः ॥

6.067.04a aśvā na yā vājinā pūtabandhū ṛtā yad garbham aditir bharadhyai |
6.067.04c pra yā mahi mahāntā jāyamānā ghorā martāya ripave ni dīdhaḥ ||

6.067.05a विश्वे यद्वां मंहना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।

6.067.05c परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ॥

6.067.05a viśve yad vām maṁhanā mandamānāḥ kṣatraṁ devāso adadhuḥ sajoṣāḥ |
6.067.05c pari yad bhūtho rodasī cid urvī santi spaśo adabdhāso amūrāḥ ||

6.067.06a ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः ।

6.067.06c दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥

6.067.06a tā hi kṣatraṁ dhārayethe anu dyūn dṛṁhethe sānum upamād iva dyoḥ |
6.067.06c dṛḻho nakṣatra uta viśvadevo bhūmim ātān dyāṁ dhāsināyoḥ ||

6.067.07a ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति ।

6.067.07c न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते ॥

6.067.07a tā vigram dhaithe jaṭharam pṛṇadhyā ā yat sadma sabhṛtayaḥ pṛṇanti |
6.067.07c na mṛṣyante yuvatayo 'vātā vi yat payo viśvajinvā bharante ||

6.067.08a ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिरृते भूत् ।

6.067.08c तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥

6.067.08a tā jihvayā sadam edaṁ sumedhā ā yad vāṁ satyo aratir ṛte bhūt |
6.067.08c tad vāṁ mahitvaṁ ghṛtānnāv astu yuvaṁ dāśuṣe vi cayiṣṭam aṁhaḥ ||

6.067.09a प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनन्ति ।

6.067.09c न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥

6.067.09a pra yad vāṁ mitrāvaruṇā spūrdhan priyā dhāma yuvadhitā minanti |
6.067.09c na ye devāsa ohasā na martā ayajñasāco apyo na putrāḥ ||

6.067.10a वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।

6.067.10c आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥

6.067.10a vi yad vācaṁ kīstāso bharante śaṁsanti ke cin nivido manānāḥ |
6.067.10c ād vāṁ bravāma satyāny ukthā nakir devebhir yatatho mahitvā ||

6.067.11a अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।

6.067.11c अनु यद्गाव स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥

6.067.11a avor itthā vāṁ chardiṣo abhiṣṭau yuvor mitrāvaruṇāv askṛdhoyu |
6.067.11c anu yad gāva sphurān ṛjipyaṁ dhṛṣṇuṁ yad raṇe vṛṣaṇaṁ yunajan ||

6.068.01a श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो यजध्यै ।

6.068.01c आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् ॥

6.068.01a śruṣṭī vāṁ yajña udyataḥ sajoṣā manuṣvad vṛktabarhiṣo yajadhyai |
6.068.01c ā ya indrāvaruṇāv iṣe adya mahe sumnāya maha āvavartat ||

6.068.02a ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।

6.068.02c मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना ॥

6.068.02a tā hi śreṣṭhā devatātā tujā śūrāṇāṁ śaviṣṭhā tā hi bhūtam ।
6.068.02c maghonāṁ maṁhiṣṭhā tuviśuṣma ṛtena vṛtraturā sarvasenā ॥

6.068.03a ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना ।

6.068.03c वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥

6.068.03a tā gṛṇīhi namasyebhiḥ śūṣaiḥ sumnebhir indrāvaruṇā cakānā ।
6.068.03c vajreṇānyaḥ śavasā hanti vṛtraṁ siṣakty anyo vṛjaneṣu vipraḥ ॥

6.068.04a ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः ।

6.068.04c प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥

6.068.04a gnāś ca yan naraś ca vāvṛdhanta viśve devāso narāṁ svagūrtāḥ ।
6.068.04c praibhya indrāvaruṇā mahitvā dyauś ca pṛthivi bhūtam urvī ॥

6.068.05a स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन् ।

6.068.05c इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥

6.068.05a sa it sudānuḥ svavām̐ ṛtāvendrā yo vāṁ varuṇa dāśati tman ।
6.068.05c iṣā sa dviṣas tared dāsvān vaṁsad rayiṁ rayivataś ca janān ॥

6.068.06a यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।

6.068.06c अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥

6.068.06a yaṁ yuvaṁ dāśvadhvarāya devā rayiṁ dhattho vasumantam purukṣum ।
6.068.06c asme sa indrāvaruṇāv api ṣyāt pra yo bhanakti vanuṣām aśastīḥ ॥

6.068.07a उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।

6.068.07c येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥

6.068.07a uta naḥ sutrātro devagopāḥ sūribhya indrāvaruṇā rayiḥ ṣyāt ।
6.068.07c yeṣāṁ śuṣmaḥ pṛtanāsu sāhvān pra sadyo dyumnā tirate taturiḥ ॥

6.068.08a नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।

6.068.08c इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥

6.068.08a nū na indrāvaruṇā gṛṇānā pṛṅktaṁ rayiṁ sauśravasāya devā ।
6.068.08c itthā gṛṇanto mahinasya śardho 'po na nāvā duritā tarema ॥

6.068.09a प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।

6.068.09c अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥

6.068.09a pra samrāje bṛhate manma nu priyam arca devāya varuṇāya saprathaḥ |
6.068.09c ayaṁ ya urvī mahinā mahivrataḥ kratvā vibhāty ajaro na śociṣā ||

6.068.10a इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।

6.068.10c युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥

6.068.10a indrāvaruṇā sutapāv imaṁ sutaṁ somam pibatam madyaṁ dhṛtavratā |
6.068.10c yuvo ratho adhvaraṁ devavītaye prati svasaram upa yāti pītaye ||

6.068.11a इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।

6.068.11c इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथाम् ॥

6.068.11a indrāvaruṇā madhumattamasya vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām |
6.068.11c idaṁ vām andhaḥ pariṣiktam asme āsadyāsmin barhiṣi mādayethām ||

6.069.01a सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।

6.069.01c जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥

6.069.01a saṁ vāṁ karmaṇā sam iṣā hinomīndrāviṣṇū apasas pāre asya |
6.069.01c juṣethāṁ yajñaṁ draviṇaṁ ca dhattam ariṣṭair naḥ pathibhiḥ pārayantā ||

6.069.02a या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना ।

6.069.02c प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥

6.069.02a yā viśvāsāṁ janitārā matīnām indrāviṣṇū kalaśā somadhānā |
6.069.02c pra vāṁ giraḥ śasyamānā avantu pra stomāso gīyamānāso arkaiḥ ||

6.069.03a इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना ।

6.069.03c सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥

6.069.03a indrāviṣṇū madapatī madānām ā somaṁ yātaṁ draviṇo dadhānā |
6.069.03c saṁ vām añjantv aktubhir matīnāṁ saṁ stomāsaḥ śasyamānāsa ukthaiḥ ||

6.069.04a आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।

6.069.04c जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥

6.069.04a ā vām aśvāso abhimātiṣāha indrāviṣṇū sadhamādo vahantu |
6.069.04c juṣethāṁ viśvā havanā matīnām upa brahmāṇi śṛṇutaṁ giro me ||

6.069.05a इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।

6.069.05c अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥

6.069.05a indrāviṣṇū tat panayāyyaṁ vāṁ somasya mada uru cakramāthe |
6.069.05c akṛṇutam antarikṣaṁ varīyo 'prathataṁ jīvase no rajāṁsi ||

6.069.06a इन्द्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या ।

6.069.06c घृतासुती द्रविणं धत्तमस्मे समुद्र स्थः कलशः सोमधानः ॥

6.069.06a indrāviṣṇū haviṣā vāvṛdhānāgrādvānā namasā rātahavyā |
6.069.06c ghṛtāsutī draviṇaṁ dhattam asme samudra sthaḥ kalaśaḥ somadhānaḥ ||

6.069.07a इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।

6.069.07c आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥

6.069.07a indrāviṣṇū pibatam madhvo asya somasya dasrā jaṭharam pṛṇethām |
6.069.07c ā vām andhāṁsi madirāṇy agmann upa brahmāṇi śṛṇutaṁ havam me ||

6.069.08a उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।

6.069.08c इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥

6.069.08a ubhā jigyathur na parā jayethe na parā jigye kataraś canainoḥ |
6.069.08c indraś ca viṣṇo yad apaspṛdhethāṁ tredhā sahasraṁ vi tad airayethām ||

6.070.01a घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।

6.070.01c द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥

6.070.01a ghṛtavatī bhuvanānām abhiśriyorvī pṛthvī madhudughe supeśasā |
6.070.01c dyāvāpṛthivī varuṇasya dharmaṇā viṣkabhite ajare bhūriretasā ||

6.070.02a असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते ।

6.070.02c राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम् ॥

6.070.02a asaścantī bhūridhāre payasvatī ghṛtaṁ duhāte sukṛte śucivrate |
6.070.02c rājantī asya bhuvanasya rodasī asme retaḥ siñcataṁ yan manurhitam ||

6.070.03a यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।

6.070.03c प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ॥

6.070.03a yo vām ṛjave kramaṇāya rodasī marto dadāśa dhiṣaṇe sa sādhati |
6.070.03c pra prajābhir jāyate dharmaṇas pari yuvoḥ siktā viṣurūpāṇi savratā ||

6.070.04a घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा ।

6.070.04c उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥

6.070.04a ghṛtena dyāvāpṛthivī abhīvṛte ghṛtaśriyā ghṛtapṛcā ghṛtāvṛdhā |
6.070.04c urvī pṛthvī hotṛvūrye purohite te id viprā īḷate sumnam iṣṭaye ||

6.070.05a मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।

6.070.05c दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ॥

6.070.05a madhu no dyāvāpṛthivī mimikṣatām madhuścutā madhudughe madhuvrate |
6.070.05c dadhāne yajñaṁ draviṇaṁ ca devatā mahi śravo vājam asme suvīryam ||

6.070.06a ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।

6.070.06c संरराणे रोदसी विश्वशम्भुवा सनिं वाजं रयिमस्मे समिन्वताम् ॥

6.070.06a ūrjaṁ no dyauś ca pṛthivī ca pinvatām pitā mātā viśvavidā sudaṁsasā |
6.070.06c saṁrarāṇe rodasī viśvaśambhuvā saniṁ vājaṁ rayim asme sam invatām ||

6.071.01a उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः ।

6.071.01c घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥

6.071.01a ud u ṣya devaḥ savitā hiraṇyayā bāhū ayaṁsta savanāya sukratuḥ |
6.071.01c ghṛtena pāṇī abhi pruṣṇute makho yuvā sudakṣo rajaso vidharmaṇi ||

6.071.02a देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने ।

6.071.02c यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ॥

6.071.02a devasya vayaṁ savituḥ savīmani śreṣṭhe syāma vasunaś ca dāvane |
6.071.02c yo viśvasya dvipado yaś catuṣpado niveśane prasave cāsi bhūmanaḥ ||

6.071.03a अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।

6.071.03c हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ॥

6.071.03a adabdhebhiḥ savitaḥ pāyubhiṣ ṭvaṁ śivebhir adya pari pāhi no gayam |
6.071.03c hiraṇyajihvaḥ suvitāya navyase rakṣā mākir no aghaśaṁsa īśata ||

6.071.04a उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।

6.071.04c अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ॥

6.071.04a ud u ṣya devaḥ savitā damūnā hiraṇyapāṇiḥ pratidoṣam asthāt |
6.071.04c ayohanur yajato mandrajihva ā dāśuṣe suvati bhūri vāmam ||

6.071.05a उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।

6.071.05c दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वम् ॥

6.071.05a ud ū ayām̐ upavakteva bāhū hiraṇyayā savitā supratīkā |
6.071.05c divo rohāṁsy aruhat pṛthivyā arīramat patayat kac cid abhvam ||

6.071.06a वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।

6.071.06c वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥

6.071.06a vāmam adya savitar vāmam u śvo dive-dive vāmam asmabhyaṁ sāvīḥ |
6.071.06c vāmasya hi kṣayasya deva bhūrer ayā dhiyā vāmabhājaḥ syāma ||

6.072.01a इन्द्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः ।

6.072.01c युवं सूर्यं विविदथुर्युवं स्वर्विश्वा तमांस्यहतं निदश्च ॥

6.072.01a indrāsomā mahi tad vāṁ mahitvaṁ yuvam mahāni prathamāni cakrathuḥ |
6.072.01c yuvaṁ sūryaṁ vividathur yuvaṁ sva1r viśvā tamāṁsy ahataṁ nidaś ca ||

6.072.02a इन्द्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह ।

6.072.02c उप द्यां स्कम्भथु स्कम्भनेनाप्रथतं पृथिवीं मातरं वि ॥

6.072.02a indrāsomā vāsayatha uṣāsam ut sūryaṁ nayatho jyotiṣā saha |
6.072.02c upa dyāṁ skambhathu skambhanenāprathatam pṛthivīm mātaraṁ vi ||

6.072.03a इन्द्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।

6.072.03c प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥

6.072.03a indrāsomāv ahim apaḥ pariṣṭhāṁ hatho vṛtram anu vāṁ dyaur amanyata |
6.072.03c prārṇāṁsy airayataṁ nadīnām ā samudrāṇi paprathuḥ purūṇi ||

6.072.04a इन्द्रासोमा पक्वमामास्वन्तर्नि गवामिद्दधथुर्वक्षणासु ।

6.072.04c जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः ॥

6.072.04a indrāsomā pakvam āmāsv antar ni gavām id dadhathur vakṣaṇāsu |
6.072.04c jagṛbhathur anapinaddham āsu ruśac citrāsu jagatīṣv antaḥ ||

6.072.05a इन्द्रासोमा युवमङ्ग तरुत्रमपत्यसाचं श्रुत्यं रराथे ।

6.072.05c युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥

6.072.05a indrāsomā yuvam aṅga tarutram apatyasācaṁ śrutyaṁ rarāthe |
6.072.05c yuvaṁ śuṣmaṁ naryaṁ carṣaṇibhyaḥ saṁ vivyathuḥ pṛtanāṣāham ugrā ||

6.073.01a यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान् ।

6.073.01c द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति ॥

6.073.01a yo adribhit prathamajā ṛtāvā bṛhaspatir āṅgiraso haviṣmān |
6.073.01c dvibarhajmā prāgharmasat pitā na ā rodasī vṛṣabho roravīti ||

6.073.02a जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।

6.073.02c घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन् ॥

6.073.02a janāya cid ya īvata u lokam bṛhaspatir devahūtau cakāra |
6.073.02c ghnan vṛtrāṇi vi puro dardarīti jayañ chatrūm̐r amitrān pṛtsu sāhan ||

6.073.03a बृहस्पतिः समजयद्वसूनि महो व्रजान्गोमतो देव एषः ।

6.073.03c अपः सिषासन्स्व१रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥

6.073.03a bṛhaspatiḥ sam ajayad vasūni maho vrajān gomato deva eṣaḥ |
6.073.03c apaḥ siṣāsan sva1r apratīto bṛhaspatir hanty amitram arkaiḥ ||

6.074.01a सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।

6.074.01c दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥

6.074.01a somārudrā dhārayethām asurya1m pra vām iṣṭayo 'ram aśnuvantu |
6.074.01c dame-dame sapta ratnā dadhānā śaṁ no bhūtaṁ dvipade śaṁ catuṣpade ||

6.074.02a सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।

6.074.02c आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥

6.074.02a somārudrā vi vṛhataṁ viṣūcīm amīvā yā no gayam āviveśa |
6.074.02c āre bādhethāṁ nirṛtim parācair asme bhadrā sauśravasāni santu ||

6.074.03a सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।

6.074.03c अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥

6.074.03a somārudrā yuvam etāny asme viśvā tanūṣu bheṣajāni dhattam |
6.074.03c ava syatam muñcataṁ yan no asti tanūṣu baddhaṁ kṛtam eno asmat ||

6.074.04a तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।

6.074.04c प्र नो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥

6.074.04a tigmāyudhau tigmahetī suśevau somārudrāv iha su mṛlataṁ naḥ |
6.074.04c pra no muñcataṁ varuṇasya pāśād gopāyataṁ naḥ sumanasyamānā ||

6.075.01a जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।

6.075.01c अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥

6.075.01a jīmūtasyeva bhavati pratīkaṁ yad varmī yāti samadām upasthe |
6.075.01c anāviddhayā tanvā jaya tvaṁ sa tvā varmaṇo mahimā pipartu ||

6.075.02a धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।

6.075.02c धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥

6.075.02a dhanvanā gā dhanvanājiṁ jayema dhanvanā tīvrāḥ samado jayema |
6.075.02c dhanuḥ śatror apakāmaṁ kṛṇoti dhanvanā sarvāḥ pradiśo jayema ||

6.075.03a वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।

6.075.03c योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥

6.075.03a vakṣyantīved ā ganīganti karṇam priyaṁ sakhāyam pariṣasvajānā |
6.075.03c yoṣeva śiṅkte vitatādhi dhanvañ jyā iyaṁ samane pārayantī ||

6.075.04a ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।

6.075.04c अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥

6.075.04a te ācarantī samaneva yoṣā māteva putram bibhṛtām upasthe |
6.075.04c apa śatrūn vidhyatāṁ saṁvidāne ārtnī ime viṣphurantī amitrān ||

6.075.05a बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।

6.075.05c इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥

6.075.05a bahvīnām pitā bahur asya putraś ciścā kṛṇoti samanāvagatya |
6.075.05c iṣudhiḥ saṅkāḥ pṛtanāś ca sarvāḥ pṛṣṭhe ninaddho jayati prasūtaḥ ||

6.075.06a रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।

6.075.06c अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥

6.075.06a rathe tiṣṭhan nayati vājinaḥ puro yatra-yatra kāmayate suṣārathiḥ |
6.075.06c abhīśūnām mahimānam panāyata manaḥ paścād anu yacchanti raśmayaḥ ||

6.075.07a तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।

6.075.07c अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति शत्रूँरनपव्ययन्तः ॥

6.075.07a tīvrān ghoṣān kṛṇvate vṛṣapāṇayo 'śvā rathebhiḥ saha vājayantaḥ |
6.075.07c avakrāmantaḥ prapadair amitrān kṣiṇanti śatrūm̐r anapavyayantaḥ ||

6.075.08a रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।

6.075.08c तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥

6.075.08a rathavāhanaṁ havir asya nāma yatrāyudhaṁ nihitam asya varma |
6.075.08c tatrā ratham upa śagmaṁ sadema viśvāhā vayaṁ sumanasyamānāḥ ||

6.075.09a स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।

6.075.09c चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥

6.075.09a svāduṣaṁsadaḥ pitaro vayodhāḥ kṛcchreśritaḥ śaktīvanto gabhīrāḥ |
6.075.09c citrasenā iṣubalā amṛdhrāḥ satovīrā uravo vrātasāhāḥ ||

6.075.10a ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।

6.075.10c पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥

6.075.10a brāhmaṇāsaḥ pitaraḥ somyāsaḥ śive no dyāvāpṛthivī anehasā |

6.075.10c pūṣā naḥ pātu duritād ṛtāvṛdho rakṣā mākir no aghaśaṁsa īśata ||

6.075.11a सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।

6.075.11c यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥

6.075.11a suparṇaṁ vaste mṛgo asyā danto gobhiḥ sannaddhā patati prasūtā |

6.075.11c yatrā naraḥ saṁ ca vi ca dravanti tatrāsmabhyam iṣavaḥ śarma yaṁsan ||

6.075.12a ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।

6.075.12c सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥

6.075.12a ṛjīte pari vṛṅdhi no 'śmā bhavatu nas tanūḥ |

6.075.12c somo adhi bravītu no 'ditiḥ śarma yacchatu ||

6.075.13a आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते ।

6.075.13c अश्वाजनि प्रचेतसोऽश्वान्समत्सु चोदय ॥

6.075.13a ā jaṅghanti sānv eṣāṁ jaghanāँ upa jighnate |

6.075.13c aśvājani pracetaso 'śvān samatsu codaya ||

6.075.14a अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।

6.075.14c हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥

6.075.14a ahir iva bhogaiḥ pary eti bāhuṁ jyāyā hetim paribādhamānaḥ |

6.075.14c hastaghno viśvā vayunāni vidvān pumān pumāṁsam pari pātu viśvataḥ ||

6.075.15a आलाक्ता या रुरुशीर्ष्ण्यथो यस्या अयो मुखम् ।

6.075.15c इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः ॥

6.075.15a ālāktā yā ruruśīrṣṇy atho yasyā ayo mukham |

6.075.15c idam parjanyaretasa iṣvai devyai bṛhan namaḥ ||

6.075.16a अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।

6.075.16c गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥

6.075.16a avasṛṣṭā parā pata śaravye brahmasaṁśite |
6.075.16c gacchāmitrān pra padyasva māmīṣāṁ kaṁ canoc chiṣaḥ ||

6.075.17a यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।

6.075.17c तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥

6.075.17a yatra bāṇāḥ sampatanti kumārā viśikhā iva |
6.075.17c tatrā no brahmaṇas patir aditiḥ śarma yacchatu viśvāhā śarma yacchatu ||

6.075.18a मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।

6.075.18c उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥

6.075.18a marmāṇi te varmaṇā chādayāmi somas tvā rājāmṛtenānu vastām |
6.075.18c uror varīyo varuṇas te kṛṇotu jayantaṁ tvānu devā madantu ||

6.075.19a यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।

6.075.19c देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥

6.075.19a yo naḥ svo araṇo yaś ca niṣṭyo jighāṁsati |
6.075.19c devās taṁ sarve dhūrvantu brahma varma mamāntaram ||

Notes by Detlef Eichler (detlefeichler(at)gmx.net):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This combined version of Rigveda is from two ITRANS files which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda.
(http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The used fonts are Ancient Sanskrit 99 and URW Palladio IT. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (6.001.01a) the font Times New Roman is used.

4. Last updated: 26 March 2009